UGC - CARE LISTED

ISSN-2321-7626
Vol. XXX, Year IX
नवम्बर 2021-जनवरी 2022

# पाणिनीया
# PĀṆINĪYĀ

त्रैमासिक - सान्दर्भिक - पुनरीक्षितशोधपत्रिका
(Quarterly Refereed and Reviewed Research Journal)

महर्षिपाणिनिसंस्कृत-वैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)

**UGC - CARE Listed**

Vol. XXX, Year IX
ISSN-2321-7626
नवम्बर 2021- जनवरी, 2022

# पाणिनीया

# PĀṆINĪYĀ

त्रैमासिक-सान्दर्भिक-पुनरीक्षितशोधपत्रिका
(Quarterly Refereed and Reviewed Research Journal)

**महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः**
**देवासमार्गः, उज्जयिनी, मध्यप्रदेशः, भारतम्**
अणुसङ्केतः (E-mail) - mpsvv.paniniya@gmail.com
अन्तर्जालपुटम् – (Website) - www.mpsvv.ac.in

**प्रधानसम्पादकः**
प्रो. विजयकुमारः सी.जी.
कुलपतिः

**सम्पादकः**
डॉ. अखिलेशकुमारद्विवेदी

**सहायकसम्पादकाः**
डॉ. तुलसीदासपरौहा
डॉ. पूजा उपाध्यायः
डॉ. उपेन्द्रभार्गवः
डॉ. संकल्पमिश्रः

**प्रकाशकः**
कुलसचिवः
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)

**सदस्यताशुल्कम्**

| | | |
|---|---|---|
| वार्षिकम् | - | 2500/- |
| मूल्यम् | - | 625/- डाकव्ययः 50/- |

**MANGUBHAI PATEL**
GOVERNOR, MADHYA PRADESH
BHOPAL - 462052

**मंगुभाई पटेल**
राज्यपाल, मध्यप्रदेश
भोपाल - 462052

क्रमांक 671/राजभवन/2021
भोपाल, दिनांक-23 अक्टूबर, 2021



# संदेश

हर्ष का विषय है कि महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय उज्जैन द्वारा शोध पत्रिका पाणिनीया का प्रकाशन किया जा रहा है।

शोध पत्रिका मानव ज्ञान को दिशा प्रदान करने का प्रभावी साधन है। ज्ञान भण्डार को विकसित एवं परिमार्जित करने में सहयोगी होती है। पत्रिका की विषय सामग्री जिज्ञासा की संतुष्टि करती है। व्यावहारिक समस्याओं के समाधान की दिशा का दर्शन कराती है।

आशा है, शोध पत्रिका में प्रकाशित लब्ध प्रतिष्ठित विद्वानों, आचार्यों और शोध छात्रों के आलेख शोध परक तथ्य और जानकारी प्रस्तुत करने में सफल होगे।

**शुभकामनाएं,**

**( मंगुभाई पटेल )**

# कार्यालय, मंत्री, उच्च शिक्षा विभाग
## मध्यप्रदेश शासन


निवास : विंध्य कोठी, भोपाल (म.प्र.), दूरभाष : 0755-2430757, 2430457
मंत्रालय : कक्ष क्र. E-216, VB-III, द्वितीय तल, भोपाल - 462003 दूरभाष : 0755-2708682
उज्जैन कार्यालय : 1/1, मुंज मार्ग, फ्रीगंज, उज्जैन, दूरभाष क्र. 0734 - 4070900


क्र....8857......./मंत्री/2020/22 भोपाल, दिनांक...03/02/2022



**शुभकामना संदेश**

अत्यन्त हर्ष का विषय है कि महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय, उज्जैन द्वारा शोध पत्रिका "पाणिनीया" का प्रकाशन किया जा रहा है जो विश्वविद्यालय अनुदान आयोग यूजीसी सूची में दर्ज है। पत्रिका में देश विदेश के प्रतिष्ठित संस्कृत विद्वानों एवं शोधच्छात्रों के शोध पत्र प्रकाशित होते है। जिनका मूल आधार संस्कृत है।

यह पत्रिका निश्चित ही अपने लक्ष्य को प्राप्त करेगी ऐसी मेरी आशा हैं।

पत्रिका प्रकाशन पर महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय परिवार को हार्दिक शुभकामनॉए।

(डॉ. मोहन यादव)

# कुलपतिसन्देशः

महतो मोदस्य विषयः यत् त्रैमासिक्याः सान्दर्भिकशोधपत्रिकायाः "**पाणिनीये**त्यस्याः" नवमवर्षस्य 30 तमोऽङ्कः पाठकानां करकमलेषु विराजते। अधुना भारते नवीनशिक्षानीत्यनुसारं शिक्षणं जायते। अस्मिन् प्रायोगिकशिक्षायाः महत्त्वं वरीवर्ति। व्यवहारेणैव प्राप्तशिक्षायाः प्रकर्षो भवति उक्तमपि महाभाष्ये **चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेन च** आचारस्य शिक्षायाः कृते नितरां शोधस्य आवश्यकता समाजे विद्यते। विविधविद्यायाः शोधलेखानां पत्रिका शिक्षाविद्भ्यः नवदृष्टिं प्रददेतेति कल्पये। अस्याम् अनुसन्धानयुक्पत्रिकायां विद्यार्थिनः कार्यकुशलिनो भविष्यन्ति। सद्विद्यायाः उपासनं सर्वदा करणीयम्, एतेन परम्परायाः विचितरङ्गन्यायेन प्रवर्धनं जायते। शिक्षणकेन्द्राणि एव समाजाय सुनीतिसहितां युक्ताचारां विद्याञ्च प्रदाय सुराष्ट्रं कर्तुं शक्नुवन्ति। अत एव पुराकालादाराभ्य अद्यावधिः शिक्षालयाः प्रासङ्गिकाः सन्ति। महर्षिभर्तृहरेः वाक्यपदीयस्य वचनं स्मरणीयम् -

**विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः।**
**विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः॥** 1/10

इयं पत्रिका नूनं हि शिक्षायाः उद्देश्यस्य पूर्तिं विधास्यतीत्याशासे।

विदुषां वशंवदः
**प्रो. विजयकुमारः सी.जी.**
कुलपतिः

# सम्पादकीयम्

अयि सुरभारतीसमुपासकाः! महतो मोदस्य कालः यत् त्रैमासिक्याः शोधात्मिकायाः पाणिनीयाख्यपत्रिकायाः नवमवर्षस्य 30 तमोऽङ्कः भवतां विद्याव्यसनिनां दृष्टिपथं समायाति । अस्यां सुधियां विविधविद्यायाः गवेषिताःशोधलेखाः धीमत्सु आनन्दं जनयिष्यति। विश्वविद्यालयानुदानायोगस्य सूच्यां (UGC CARE LISTED) नामाङ्कितेयमिति गुणवत्तायाः मापदण्डमादधाति। त्रिसृभिःसंस्कृतहिन्द्याङ्ग्लभाषाभिः शास्त्रीयविषयेषु गुम्फिताः शोधनिबन्धाः अधिजिगांसमानेभ्यः छात्रेभ्यो लेखनकर्म्मणि प्रेरणां प्रयच्छन्ति। अधुना मूल्यशिक्षायाः प्रसारार्थं जगति प्रयत्नः जायते । वस्तुतः संस्कृतवाङ्मये प्रारम्भशिक्षणे पञ्चतन्त्र–नीतिसङ्ग्रहादिग्रन्थेषु **कथाच्छलेन बालानां नीतिस्तदिह कथ्यते** इति वदद्भिर्विद्वद्भिराचार्यैः मनोवैज्ञानिकरीत्या बालानां मनसि संस्कारं संचारयति, एतेन विना प्रयासं बालाः मूल्यशिक्षायुजो भवन्ति । शास्त्राणि जीवनस्य मार्गदर्शनं कुर्वन्ति। काव्यानि नायकादिब्याजेन व्यवहारं दिशीकरोति । **रामादिवद् वर्तितव्यं न च रावणादिवद्, सेवाधर्मो परमगहनो योगिनामप्यगम्यः, प्रियं च नानृतं ब्रूया**दित्यादि विषयान् कथम् नैतिकमूल्याद् विमुखेभ्यः युवभ्यः प्रददेयुः? इत्थं पत्रिकायामस्यां ससन्दर्भा अनुसन्धाननिबन्धाः युवानां सद्विचारान् दृढीकरिष्यन्ति । ऐषमः 75 तमायाः स्वतन्त्रतायाः अमृतमहोत्सवमधिकृत्य (75 आजादी का अमृत महोत्सव) कार्यक्रमाः आयोज्यन्ते, वयमपि साहित्यसपर्यया राष्ट्रं सेवामहे । अस्माकं क्रान्तदर्शिनः मुनयः ऋषयश्च विचारान् जग्रन्थ। अस्मदीयाः गवेषकाः नूनं हि ऋषिहृदयं प्राप्स्यन्ति, लेखेन प्रापयिष्यन्ति तेषामभिप्रायानस्मभ्यम् । विद्वांसः, शोधच्छात्राः,शास्त्ररसिकाश्च सारस्वतलाभं प्राप्नुयुरिति धिया भगवन्तं श्रीमहाकालेश्वरं प्रार्थये।

**विदुषां वशंवदः**
**सम्पादकः**

# अनुक्रमणिका


**संस्कृत - प्रभागः**

1. क्त्वाप्रत्ययार्थतत्कारणविमर्शः 1
**- डॉ. प्रदीपपाण्डेयः**

2. संस्कृतसाहित्ये वैज्ञानिकशलाकाः 11
**- डॉ. रमादेवी वी.**

3. वैदिकजीवनचर्या चिकित्सापद्धतिश्च 15
**- डॉ. संकल्पमिश्रः**

4. उपसर्गार्थचन्द्रिकानुसारं सम्पूर्वकस्य ईक्ष दर्शने इति धातोः अर्थविमर्शः 20
**-नित्यानन्दमाना**

5. 'असिद्धवदत्राभात्' इति सूत्रे बालमनोरमा-सिद्धान्तरत्नाकरकारयोः दृष्टिः 24
**- श्रीनिवास स्वाई**

6. सरस्वतीकण्ठाभरणदिशा 'हयवरलण्' इति सूत्रविमर्शः 30
**- कृष्णगोपालपात्रः**

7. धर्मशास्त्रेषु प्रतिपादितयोः नामकरणान्नप्राशनसंस्कारयोः व्यावहारिकता 36
**- डॉ. पंकजाघईकौशिकः**

8. संस्कृत-मध्यभारतीयार्यभाषयोः परिचयः वैशिष्ट्यञ्च 43
**- डॉ. लक्ष्मीकान्तषडङ्गी**

9. सामर्थ्यतत्त्वविमर्शः 56
**- डॉ. अरविन्दमहापात्रः**

10. व्याकरणसाहित्यशास्त्रसम्मतवृत्तिविचारः 64
**- रामकुमारी**

**हिन्दी - प्रभागः**

11. श्रीमद्भवद्गीता की उपादेयता 70
**- डॉ. केशर सिंह चौहान**

12. योग साधना के विविध आयाम 74
**- डॉ. श्रेयस श्रीधर 'शास्त्री' कोरान्ने**

13. विज्ञानभिक्षुकृत योगसारसंग्रह : संक्षिप्त परिचय 78
**- डॉ. साधना कंसल**

14. मानव-जीवन में वेदोक्त संस्कारों की उपादेयता 83
**- डॉ. मनोज कुमार द्विवेदी**

**आंग्ल-प्रभागः**

15. Optimal Learning Environments and Support for Students 90
**- Nilima B. Rindhe & Dr. Hrushikesh Dalai**

16. A Critical Study of Mind from the Viewpoint of Advaita Vedānta 98
**- Dr. Navin Dixit**

17. Role of Gāyatrī Mantra Recitation on Cognitive Function of University Students 113
**- Mr. Sudhir Ranjan Singh, Dr. Amaravathi Eraballi & Dr.Rajesha HK**

**UGC - CARE Listed**

**पाणिनीया**
Vol. XXX, Year IX

# क्त्वाप्रत्ययार्थतत्कारणविमर्शः

**डॉ. प्रदीपपाण्डेयः***

**सैषा संसारिणां संज्ञा बहिरन्तश्च वर्तते।**
**तन्मात्रामप्यतिक्रान्ते चैतन्यं सर्वजन्तुषु॥**

इति भर्तृहरिप्रतिपादितसिद्धान्तरीत्या त्वेदं सत्यं यत् समस्तलोकव्यवहारस्य प्रवर्तिका खलु वागेव। सैव वक्तुः ज्ञानं बहिः प्रकाशयति। श्रोतुश्च प्रवृत्यादिभिर्ज्ञानं गमयति। यद्येषा वाक् मनुष्येषु व्यक्ता नाभविष्यत्तर्हि तेषां हिताहितप्रवृत्ति निमित्तहेतुविज्ञानं बहिः प्रकाशं नागमिष्यत्। नैव च लोक आप्तोपदेशं विना हिताहित प्रवृत्तिव्यवहास प्रावर्तिष्यतेति समस्तो गुरुशिष्यसम्प्रदायः प्रयोज्यप्रयोजकवृद्धव्यहारश्च समुच्छिद्येत । सा च वाक् व्यक्ताऽव्यक्तभेदेन द्विधा । तत्र गवाश्वकपिककाकप्रभृतिपशुपक्ष्यादीनामुच्चार्यमाणा, अव्यक्ता, यां वाचं मनुष्यो वदन्ति सा व्यक्ता। परञ्च मनुष्याः स्वाभिप्रायं परान् बोधयितुमेव शब्दप्रयोगरूपं व्यापारं कुर्वन्ति । यतो लोके पदं निराकांक्षबोधजनकं न भवति, किन्तु वाक्येनैव निराकांक्षबोधो जायते, अतो लोके वाक्यस्यैव प्रयोगः । अर्थबोधनाय प्रयुक्तवाक्येनाभिलषितार्थबोधः तदैव सम्भवति यदा तत् वाक्यघटकपदानि व्याकरणेन संस्कारितानि भवन्ति । उक्तमपि वाल्मीकिना यत् 'संस्कारहीना यथा वाचा अर्थान्तरं गच्छति ।'[1] एतद् ऋषिवचनस्येदमेव तात्पर्यमवगन्तव्यं यत् संस्कारयुक्तवचसैवा भीष्टार्थबोधः । यद्यप्यस्मन्नये शब्दापशब्दाभ्यां समानरूपेणार्थबोधः, तथापि संस्कारसिद्धशब्दः अर्थबोधेन समं पुण्योपपत्तिहेतुत्वात्तस्यैव प्रयोगः कर्तव्यः। संस्कारस्तु व्याकरणस्मृत्यैव । साधुशब्दज्ञानाय वर्णितासु नानाप्रणालिषु प्रकृतिप्रत्ययविभागोऽपि तज्ज्ञानायैका समुचिता सरणिः। अनया सरण्या यदा साधुशब्दानां ज्ञानं कूर्मः तदा प्रकृत्यर्थेन सह प्रत्ययार्थोऽपि निर्णीतो भवति । अत्र केषाञ्चित जनानामाक्षेपो यत् संसारवच्छब्दस्त्वनादिकालतो विद्यते एव व्यवहारविषयः । व्यवहारत एव

* सहाचार्यः केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः (म.प्र.)

साधुशब्दज्ञानसम्भवे प्रकृतिप्रत्ययविभागद्वारासाधुशब्दज्ञानोपायभूतं व्याकरणमनर्थकम्, किन्तु तन्मतं स्वतः एव व्याकरणाऽध्ययनफलनिरूपणप्रसङ्गे भाष्यकारेण निरस्तम्। उक्तञ्च न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः ज्ञातुम् । न च लोके वाक्य एव निराकांक्षबोधजनकतासत्त्वेन वाक्यार्थज्ञानस्य च वाक्यशास्त्रेणैव सम्भवे पुनः पदशास्त्रस्याऽऽनर्थक्यमिति वाच्यम् । वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणता सर्वैरेकमत्येन स्वीकारात् पदार्थज्ञानं विना वाक्यार्थज्ञानाऽसम्भवात् । पदार्थज्ञाने च शक्तिज्ञानस्य कारणतासत्त्वेन पदनिष्ठशक्तिज्ञानं तु लघुना व्याकरणेनैव सम्भवति । यतोहि सर्वं नामधातुजमाह इति सिद्धान्तरीत्या सर्वेषां शब्दानां धातुजन्यत्वात् धातुप्रकृतिकप्रत्ययविशिष्टसमुदायरूपपदार्थज्ञाने तदवयवीभूत प्रकृतिप्रत्ययार्थयोः ज्ञानस्यावश्यकत्वात् । एवं रीत्या प्रकृतिप्रत्ययार्थज्ञानं विना वाक्यार्थज्ञानं तद्वदेव न भवितुमर्हति यथा पञ्चकोशैराच्छादितस्य हृत्पुण्डरीकस्य ज्ञानं पञ्चकोशैर्ज्ञानं विना न भवति, तथैव वर्णपदाभ्यामाच्छादितस्य वाक्यस्य ज्ञानमपि वर्णपदाभ्यां ज्ञानं विना सम्भवति। तस्मात् यथा हृत्पुण्डरीकस्य ज्ञानाय पञ्चकोशानां ज्ञानमावश्यकं तथा वाक्यार्थज्ञानाय प्रकृतिप्रत्ययसंकेतितवर्णपदार्थयोर्ज्ञानमावश्यकम् । उक्तञ्च अन्नं प्राणो मनो बुद्धिः आनन्दश्चेति पञ्च ते । कोशैस्तैरावृतस्स्वात्मा विस्मृत्या संसृतिं व्रजेत् ॥[2] पूर्वोक्तरीत्येदं सिद्धयति, यत् प्रकृतिप्रत्ययार्थनिर्णयं विना वाक्यार्थज्ञानस्याऽसम्भवे प्रकृतिप्रत्ययार्थनिर्णयः कर्तव्य एव। एवं सति गलविलाधसंयोगाऽनुकूलव्यापारनिवृत्त्यनन्तरं व्रजति, इत्यर्थे भुक्तवा व्रजति, इति वाक्यप्रयोगः । तत्र भुक्तवा, इति पदे अंशद्वयम् , कः प्रकृत्यंशः अपरश्च प्रत्ययांशः । तत्र प्रकृत्यंशभूते धात्वर्थे विकल्पाऽभावेऽपि प्रत्ययांशे त्तवानिष्ठवाचकतानिरूपिताच्यतायां मतभेदसत्त्वेन दर्शनान्तरीयसिद्धान्तनिरसनपूर्वकवैय्याकरणमतस्फोरणाय विषयं प्रस्तौमि।

अत्र वेदान्तिनो ब्रुवन्ति यत् समानकर्तृकत्वं पूर्वकालत्वञ्च त्तवाच्यम् । पूर्वकालत्वमेव क्त्वावाच्यमिति मीमांसकाः । पूर्वकालिकत्वमात्रं न क्त्वावाच्यम, अपित्वव्यवहितत्त्वमपि तद्वाच्यमिति नैय्यायिकाः । नैय्यायिकेषु नव्यनैय्यायिकाः आनन्तर्यमेव शक्यमित्यामनन्ति । आनन्तर्यस्य स्वरूपं प्रतिपादयन्तः ततोऽपि नव्याः तत्कालीनप्राग्भावप्रतिपयोगित्वरूपं तदधिकरणसमयध्वंसाधिकरणसमयोत्पत्तिमत्त्वरूपं वाऽनन्तर्यं शक्यमित्युक्तवन्तः । तदभाववदवृत्तित्वरूपं व्याप्यत्वमपि क्त्वावाच्यमिति, अपिना पूर्वकाले, इति रामकृष्णभाट्टा चार्याः। पूर्वकाले क्त्वाप्रत्ययो भवतीति साहित्यकाः। कृतिरेवक्त्वाप्रत्ययार्थः इत्यपि केचित् वदन्ति । एवं रीत्या नानामतसत्त्वे, उचिताऽनुचितत्त्वविमर्श आवश्यक इति मत्वा यथामपि विषयं तनोमि।

01- पूर्वकालत्वमेव क्त्वावाच्यमिति मतविवेचनम् – समानकर्तृकयोः गुणप्रधानक्रिययोर्मध्ये प्रधानक्रियापेक्षया या पूर्वकालिकक्रिया तद्वाचकः क्त्वा। यतः क्रिया धातुनैवोक्तः अतः पूर्वकालमात्रमेवार्थः क्त्वाप्रत्ययस्य । तात्पर्यमिदमस्ति यत् यस्मात् कस्माद्धातोरपि क्त्वाप्रत्ययो भवति, तत्र क्त्वाप्रत्ययप्रकृतिभूत धातूपस्थाप्यायाः क्रियायाः परिसमाप्ति, अग्रिमायाः कस्याश्चितक्रियायाश्चोत्पत्तिर्नियमतः प्रतीयते। तत्र प्रतीयमाना या

अग्रिमा क्रिया तदपेक्षया क्त्वाप्रत्ययप्रकृतिभूतधातूपस्थाप्यायाः क्रियायाः भूतत्वात् भूतकाले क्त्वाप्रत्ययः इति सिद्ध्यति। ननु भूतत्त्वस्याऽनिर्धारितत्त्वेन भुक्त्वा एकवर्षोत्तरं गते चैत्रे, चैत्रो भुक्त्वा व्रजतीति प्रयोगापत्तिवारणाय प्रधानक्रियाव्यवहितपूर्वकालिकत्व एव क्त्वाप्रत्ययस्य शक्तिरुचिता, न तु पूर्वकालीनत्वमात्र इति वाच्यम्। भोजनानन्तरं घटकादिविलम्बेन गते चैत्रे, चैत्रो भुक्त्वा व्रजततीति प्रयोगानुपपत्तेः । निरुक्तवाक्ये भोजनस्य गमनाव्यवहितपूर्वकालवृत्तित्वाऽभावात् । तस्मात् प्रधानक्रियाव्यवहितपूर्वकालवृत्तित्वे क्त्वाप्रत्ययस्य शक्तिः वक्तुमशक्यम्। ननु यदि प्रधानक्रियाव्वहतिपूर्वकालवृत्तित्वे क्त्वा प्रत्ययस्य शक्तिः न स्वीक्रियते तदा भुक्त्वा एकवर्षोत्तरं गते चैत्रे, चैत्रो भुक्त्वा व्रजतीति प्रयोगापत्तिवारणं कथमिति चेन्न । क्त्वाप्रत्ययविधायके सूत्रे[3] समानकतृकयोः, इति पदोपादानात् क्रियाद्वयसत्त्वे एव क्त्वाप्रत्ययो भवति। तत्रैका क्रिया पूर्वकालिकी भवति, अपरा च वर्तमानकालिकी। यतः वर्तमानकालिकक्रियायाः प्रारम्भः पूर्वकालिक क्रियायाः समाप्त्यन्तरमेव भवति। तत्र पूर्वकालिकक्रियासमाप्त्यन्तरं वर्तमानकालिकक्रियायाः प्रारम्भात् प्राक् घटिकामुहूर्तादि नानावधिककालस्य वृत्तित्वेन तस्मिन् काल एव क्त्वाप्रत्ययसम्भवात्। न तु वर्षात्मकस्थूल कालघटिकप्रधानक्रियापूर्वकालवृत्तित्वे । यतः अत्र प्रधानक्रियायाः लाभः तिङादिप्रकृतित एव भवति । अतः पूर्वकालीनत्वमात्रं क्त्वाप्रत्ययार्थः सिद्ध्यति । पूर्वकालीनत्वस्य च तिङ्प्रकृत्यर्थप्रधानक्रियाविशेष्यतया अन्वितस्य क्त्वाप्रत्यायर्थभोजनक्रियायां विशेषणतया अन्वयः । एवं स्वप्रकृत्यर्थभोजनादिसमान-कर्तृकत्वमपि क्त्वाप्रत्ययार्थः तच्च प्रधानक्रियायाः विशेषणतया अन्वेति। एवं च चैत्रो भुक्त्वा व्रजतीति वाक्यात् गमनक्रियापूर्वकालीनभोजनसमानकर्तृकं यत् गमनं तदनुकूलकृतिमांश्चैत्रः इत्याकारको बोधः उपपद्यते। एवं रीत्या पूर्वोक्तानि यानि मतानि सन्ति, तेषु सर्वेषु मतेषु क्त्वाप्रत्यये वाचकतैवाऽस्ति। परञ्च पूर्वोक्तेषु मतेष्वेकमपि मतं वैय्याकरणरीत्या न समीचीनम्, अतः स्वमतं प्रतिपादयितुं कौण्डभट्टेनोक्तं यद् अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः । समानकर्तृकत्वादिद्योत्यमेषां स्थितिः ।[4] अयं भावः, अव्यपसंज्ञाप्रयोजकः कृत्प्रत्ययाः असत्त्वभूते भावे भवन्ति, इत्यर्थकेनाऽव्ययकृतो भावे इति वार्तिकरूपाऽनुशासनप्रामाण्यात् क्त्वादीनां भावे विधानम्। न च पाक इत्यादौ धञादेरपि भावार्थकत्वदर्शनादव्ययेति विशेषणेन तेषामसंग्रह इति वाच्यम् । लिङ्गान्वयि रूपासत्त्वभूतार्थप्रतिपादककृतामेव वार्तिकग्रहणात् । घञादीनाञ्च 'घञ्जपः पुंसि' इति लिङ्गानुशासनानुरोधात् लिङ्गान्वय्यर्थप्रतिपादकत्वात् । एवञ्च धात्वार्थानुवादक एव त्तवादिरिति वैय्याकरणानां मतम्। यतः धात्वर्थस्यानुवादकः वर्तते क्त्वाप्रत्ययः अतो द्योत्यः। ननु क्त्वादीनां भावमात्रार्थकत्वाङ्गीकारे समानकतृकयोः पूर्वकाले, इति सूत्राक्षरविरोधः, यतोहि सूत्रेऽस्मिन्' अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा'[5] इति सूत्रेण क्त्वापदस्यानुवृत्तिः, अनुवर्तमानं क्त्वापदं विधेयबोधकम्, उद्देश्यबोधकं समानकर्तृकम् पूर्वकालश्च। एवं रीत्या अनेन सूत्रेण समानकर्तृकं पूर्वकालश्चोद्दिश्य क्त्वाप्रत्ययो विधीयते । यदि क्त्वानिष्ठवाचकतानिरूपितावाच्यता समानकर्तृके पूर्वकाले च नास्ति चेत तदा विरोधः स्पष्टैवेति वाच्यम् । क्त्वाप्रत्ययस्थले समानकर्तृत्वादेर्भानं द्योत्यत्वेनैव भवति न तु

वाच्यत्वेनेति तात्पर्यबोधनाय तयोः सार्थक्यात्। अर्थात् क्त्वाप्रत्ययेन अर्थद्वयमेव द्योत्यम्। न च स्वसमभिव्याहृतपदनिष्ठशक्त्युद्बोधकत्वमेव द्योतकत्वं प्रसिद्धम् । अतो द्योतकतामतेऽपि कयाचित् शक्त्यैवार्थस्य बोधः । सा च शक्तिः व्यञ्जनैव । एवं रीत्या द्योत्यत्वेऽपि व्यञ्जनाशक्तेः स्वीकारस्यावश्यकत्वे नास्मिन्मतेऽपि न कश्चन लाघवः इति वाच्यम् । द्योतकतामते संसर्गविधयैव क्त्वाद्यर्थस्य भानेन शक्ते रुपयोगाभावात् । इदं तात्पर्यम् – ''धातुसम्बन्धे प्रत्ययाः'' इति सूत्रे सर्वेषां व्रजनक्रियां प्रति पौर्वकाल्यम् इति भाष्यात्। अस्यैव भाष्यप्रतीकमादाय कैय्यटेनोक्तं यत् आख्यातवाच्यायाः क्रियायाः विशेष्यत्वात् प्राधान्यात्तां प्रति सर्वासां विशेषणत्वात् । इति ग्रन्थरीत्या भुक्त्वा व्रजति, इत्यादौ विशेष्यविशेषण-भावापन्नविषयताप्रयोजकत्वरूपैकवाक्यता सर्वैःवैय्याकरणैः स्वीक्रियते । सा चैकवाक्यता भोजनपाकक्रिययोर्विशेष्यविशेषणभावमन्तरेणानुपपन्ना । विशेष्यविशेषणभावनियामकः कश्चन सम्बन्ध एव भवति। सम्बन्धमन्तरेण विशेष्यविशेषणभावासम्भवात्। क्त्वाप्रकृतिको यो धातुः तिङ्प्रकृतिश्च यो धातुः तयोः विशेष्यविशेषणभावनिरूपकः सम्बन्धः जन्यत्वम् , समानाधिकरण्यम् , पूर्वोत्तरभावः व्याप्यत्वश्चे त्यादिरनेकविधः । यदि विशेष्यविशेषणभावं विनैव पदसमूहमात्रस्यैकाक्यत्वं स्वीक्रियते तदा भुङ्क्ते व्रजति, इति पदसमूहादपि यत् किञ्चित्कर्तृकाभुजिक्रिया यत् किञ्चित्त्कर्तृका व्रजनक्रिया इति बोधपत्तेः । अत्र पदसमुदाये एकमुख्यविशेष्यताशालिबोधजनकत्वरूपमेकवाक्यत्वं नास्ति । यद्यप्यत्रैकवाक्यत्वेपि न कश्चन दोषः तथापि सर्वजनविरोधानुभवरूपो दोषो बोध्यः । अपि च विशेष्यविशेषणीाावं विनैव स्वतः पदसमूहमात्रस्यैकवाक्यत्व स्वीकारे समानवाक्ये निघातः, इति वार्तिकस्य वैय्यार्थ्यापत्तिः सर्वत्रैवोक्तैकवाक्यस्य सत्त्वात् । ननु भुक्त्वा व्रजति इत्यत्रैकवाक्यताभङ्गापत्तिभिया समानकर्तृकत्वादौ क्त्वानिष्ठवाचकतानिरूपिता वाच्यता न स्वीक्रियते किन्तु एकवाक्यतायाः उपपादनं तु क्त्वाप्रत्ययस्य कर्त्रर्थकत्वे भवितुं शक्नोति। यतोहि कर्त्रर्थकत्वे उभयक्रियाकर्त्तोरभेदान्वयेन भोजनकर्त्रभिन्नकर्तृवृत्तिभुजिक्रियेति बोधसम्भवादिति चेन्न । उक्तबोधस्वीकारे एकवाक्यत्वसम्भवेऽपि तथाविधबोधस्य सर्वैरुपेक्षणात् सः सिद्धान्तः त्यज्यते । यतः क्त्वाप्रत्ययप्रकृतिभूतो यो धातुः तन्निष्ठप्रकारतानिरूपिता विशेष्यता यत्र तिङ्प्रत्ययप्रकृतिभूतधात्वर्थे भासते, तयोश्च प्रकारविशेष्ययोः नियामकसंसर्गे एव क्त्वाप्रत्ययः । ते च संसर्गाः नैकविधाः, अतः कुत्र कः संसर्गो भासते इति विचारः उपस्थाप्यते।

**जन्यत्वम् –** भुक्तवा तृप्तः । अत्र हि तृप्तौ जन्यता भुजिक्रियायां हि जनकता। एवं सति भुक्तवा तृप्तः इत्यादौ भोजननिष्ठजनकतानिरूपिता जन्यता तृप्तौ भाषते इति कृत्वा तृप्तिभुजिक्रिययोर्मध्ये जन्यजनकभावसंसर्गस्य प्रतीयमानत्वात्तद्योतकः क्त्वाप्रत्ययः । जन्यजनकभावसम्बन्धद्योत्वे एव क्त्वाप्रत्ययस्य साधुतेति स्वीकारादेव तृप्तौ भोजनक्रियानिष्ठजन्यतावत् पानक्रियानिष्ठजन्यतासत्त्वेऽपि भोजनजन्यत्वविवक्षायां पानक्रियाजन्यत्वमादाय पीत्वा तृप्तः इति वाक्यप्रयोगो न साधुतां भजति । अपितु पानजन्यत्वविवक्षायामेव।

**समानाधिकरण्यम् –** समानाधिकरण्यसम्बन्धेनेदं तात्पर्यं यत् क्त्वाप्रत्ययप्रकृतिभूत-धातुजन्यव्यापारस्य आश्रयीभूतो यः कर्ता सः एव कर्ता यदि तिङ्प्रत्ययप्रकृति-भूतधातोरप्यस्ति तदैव पूर्वकालिकक्रियावाचकाद्धातोः क्त्वाप्रत्ययस्य साधुता। अन्यथा विभिन्नपुरुषकर्तृकक्रियाद्वयमादाय क्त्वाप्रत्ययस्य साधुतापत्तिः स्यात्। यथा भुक्त्वा तृप्तः, इत्यत्र तृप्तौ भोजनक्रियानिरूपितजन्यता यथा वर्तते यथा पानक्रियानिरूपितजन्यताऽपि, किन्तु भुजिक्रियानिरूपितकर्तृत्वं भिन्नम् , पानक्रियानिरूपितकर्तृत्वं भिन्नम, अतः उभयो क्रिययोः कत्रोः भिन्नत्वेन समानाधिकरण्याऽभवात् न त्तवाप्रत्ययस्य साधुता अपितु समानकर्तृकत्वे साधुता। ननु भोजननिष्ठजनकता निरूपिता जन्यता तृप्तौ यदा भाषते तदैव भुक्तवा तृप्तः इति वाक्यप्रयोगःस्यादेतर्थं जन्यतासम्बन्धः स्वीकृतो वर्तते, एवं सति जन्यतासम्बन्धस्वीकारे समानाधिकरण्यसम्बन्धस्वीकारो व्यर्थः, यतोहि समानकर्तृकत्वस्य जन्यजनकभावसम्बन्धे एव सम्भवः, विभिन्नकर्तृकक्रिययोर्जन्यजनकभावाभावात्। एवञ्च क्रिययोरेकाधिकरण वृत्तिकर्तृतानिरूपकत्वरूपसमानाधिकरण्यस्य जन्यत्वेनैव लाभसम्भवे सामानाधिकरण्य-सम्बन्धस्वीकारो व्यर्थः इति। न च देवदत्तः यज्ञदत्तं ग्रामं गमयति, इत्यादौ देवदत्तनिष्ठः व्यापारः प्रयोजकव्यापारः, यज्ञदत्तनिष्ठो यो व्यापारः सः प्रयोज्यः। दज्ञदत्तनिष्ठो यः प्रयोज्यः व्यापारः स तु देवदत्तनिष्ठप्रयोजकव्यापारजन्यः एव। अतः प्रयोज्यप्रयोजककर्तृनिष्ठक्रिययोरपि जन्यजनकभावदर्शनात् समानाधिकरण्ये एव जन्यजनकभावः इति सिद्धान्तो न समीचीनमिति वाच्यम्। साक्षात्सम्बन्धावच्छिन्नः यः जन्यजनकभावः तस्यैवात्र विवक्षितत्वात्। प्रयोज्यता च नहि साक्षाज्जन्यतावच्छेदिकैव भवति किन्तु परम्परयावच्छेदकोऽपि प्रयोज्यो भवति। अत एव गां दोग्धि पयः, इत्यादौ गोः कर्मसंज्ञा। अन्यथा पयनिष्ठविभागस्य गोवृत्तिव्यापारजन्यत्वेन कर्तृत्वेनविवक्षितगोप निष्ठव्यापारजन्यत्वाऽभावेन कर्तृसंज्ञा न स्यात्। यदा तु प्रयोज्यत्वं जन्यजन्यत्वं स्वीक्रियते तदा गोपनिष्ठव्यापारजन्यः गोनिष्ठः व्यापारः तन्निष्ठव्यापारजन्यः पयनिष्ठः विभागः, अतः विभागेऽपि कर्तृभूतगोपनिष्ठव्यापारजन्यजन्यत्वसत्त्वेन कर्मसंज्ञा गोपदस्य सुलभा। भुक्त्वा व्रजति, इति वाक्ये भुज्धातूत्तरक्त्वाप्रत्ययः यथा समानाधिकरण्यसंसर्गस्य द्योतकः तथा पूर्वोत्तरकालिकत्वरूपसंसर्गस्यापि द्योतकः। अत एव निरुक्तवाक्येन भोजनसमानाधिकरणा तदुत्तरकालिकी व्रजनक्रियेति बोधः।

**व्याप्यत्वसम्बन्धः –** अधीत्य तिष्ठति, मुखं व्यादाय स्वपिति। क्त्वाप्रत्ययेन व्याप्यत्वसम्बन्धस्य द्योतनं कुत्र भवतीति विचारणायामुक्तं भूषणकृता यत् अधीत्य तिष्ठति, मुखं व्यादाय स्वपिति, इत्यादावध्ययनव्यादानयोरभावकालेऽप्रयोगात् यदा यदाऽस्य स्थितिः, स्वापप्यच–तदा तदाऽध्ययनम्, मुखव्यादानञ्च कालविशेषावच्छिन्न-व्याप्यत्वबोधात्।[6] इदं तात्पर्यं यत् अध्ययनं कुर्वन् तिष्ठतीति वाक्यसमानार्थकं वाक्यान्तरं विद्यते, अधीत्य तिष्ठतीति वाक्यम्। अतोऽत्र अध्ययनक्रियानिष्ठजनकतानिरूपिताजन्यता तिष्ठति क्रियायां नास्ति, अतो जन्यत्वसम्बन्धोऽत्र न वक्तुं शक्यः। यद्यपि अध्ययनतिष्ठतिक्रिययोरेका-धिकरणवृत्तिकर्तृतानिरूपकत्वरूपं यत् समानाधिकरण्यं तस्य सत्त्वे न काचित् विप्रतिपत्तिः तथा यत्रैकदिवसमात्रेऽध्ययनं स्थितिस्तु मासं यावत् तथाविधस्थित्यध्ययनयोः सत्त्वे वाक्यप्रयोगवारणाय समानाधिकरणसंसर्गमात्रविवक्षायां

क्त्वाप्रत्ययो न नित्यमधि-पूर्वकातीङ्घातोः विधेयः । तथा चात्र न पूर्वोत्तरकालिकत्वम् , जन्यत्वम्, समानाधिकरण्यञ्च संसर्गः सम्भवति, तस्मादगत्य व्याप्यत्वसंसर्गस्वीकारे एव क्त्वाप्रत्ययस्य साधुता। व्याप्यत्वञ्चात्र तदभाववदवृत्तित्वरूपं ग्राह्यम्। स्वपदेन अध्ययनम्, एवञ्च अध्ययनाऽभावे स्थितेरप्यभावः। अत्र व्यापकता, अध्ययनक्रियायां विवक्षितं व्याप्यता च स्थितिक्रियायाम् । एव सति अध्ययनाऽभवाधिकरणे स्थितिक्रियायाः अवृत्तित्वे एव एतादृक् वाक्यानामर्थबोधनाय प्रयोगः । एवमेव मुखं व्यादाय स्वपिति, इति वाक्यप्रयोगः स्वाधिकरणकालिकं मुखव्यादानमिति बोधायेष्टः । अत्रापि पूर्ववत् जन्यत्वादिसम्बन्धस्याऽभावात्, व्यादायेत्यत्र क्त्वाप्रत्ययः दुर्लभः। किन्तु यदा क्त्वा प्रत्ययः व्याप्यत्वरूपसम्बन्धद्योत्ये भवतीति स्वीक्रियते तदा अत्रापि न काचित् विप्रत्तिपत्तिः। यतोहि अत्र स्वापक्रियायां व्याप्यत्वं विवक्षितं व्यादानक्रियायां व्यापकत्वम् । एवं सति व्यादानाऽभवाधिकरणे स्वापक्रियायाः अवृत्तित्वम्। ननु यत्र यत्र व्याप्यव्यापकभावः तत्र-तत्र सर्वत्र व्याप्यव्यापकभावत्वेन विवक्षितयोः समानाधिकरण्यं भवति, अथ च व्याप्यतावच्छेदकःव्यापकतावच्छेदकश्च नियामकः कश्चन सम्बन्धो भवति । यथा बह्निधूमस्थले चत्वरादिषु उभयोः समानाधिकरण्यम् । व्याप्यतावच्छेदकः व्यापकतावच्छेदकश्च नियामकः सम्बन्धः संयोगः। प्रकृते तथाऽभवान्न व्याप्यत्वसम्बन्धो भवितुमर्हतीति चेन्न। व्याप्यतावच्छेदकः व्यापकतावच्छेदकश्च सम्बन्ध प्रकृते कालिकः एव। उभयोः क्रिययोः कालिकसम्बन्धेन काले एव विद्यमानत्वात् समानाधिकरण्यमप्युभयोः सम्भवात्। ननु मुखं व्यादाय स्वपिति, इत्यत्र स्वपनक्रियापेक्षया व्यादानक्रियायां व्यापकत्वं प्रतिपदितम् । व्याप्यव्यापकभावः समानाधिकरण्ये एव भवति । किन्तु व्याप्यत्वेन विवक्षिताधिकरणे व्यापकत्वेन विवक्षितस्याऽभावो न भवितव्यः, तथा सत्येव व्याप्यव्यापकभावः सुरक्षितो भवति। यथा दृश्यते वह्निधूमस्थले। एवं कदापि न भवति यत् वह्न्यभावाधिकरणे धूमस्य वृत्तिता स्यात्। प्रकृते न तथा। यतोहि लोके दृश्यते यत् कश्चन जनः स्वापकाले कदाचित् मुखव्यादानं करोति, सः एव जनः कदाचित् स्वापकाले मुखव्यादानं न करोति, एवं सति व्यापकत्वेन विवक्षितस्य मुखव्यादानाऽभावेऽपि स्वापस्य सत्त्वेन नोभयोर्मध्ये व्याप्यव्यापकभावो भवितुमर्हति । एवमेव स्थित्यध्ययनयोः मध्ये, अध्ययनक्रियायां व्यापकत्वं विवक्षितम्, किन्त्विदं नावश्यकं यत् अध्ययनाऽभावे स्थितिक्रिया न सम्भवति । एवाञ्चाऽभावाऽधिकरणे स्थितिक्रियायाः सत्त्वेन अत्रापि न व्याप्यव्यापकभावो भवितुं शक्नोति चेन्न । व्याप्यताया व्यापकतायाश्चावच्छेदको यः कालविशेषो विवक्षितः सः वक्तृतात्पर्य्यविषयीभूतः क्षणादिरूप एव ग्राह्यः । एवं सति क्रियद्वयोरेकक्षणावच्छेदेन विवक्षिततत्वा त् न भिन्नकालमादाय व्याप्यव्यापकभावहानिः । तात्पर्यमिदमस्ति यत् मुखव्यादानविशिष्टस्वाधिकरणं तदभाव विशिष्टस्वाधिकरणञ्चैकं कालं व्यप्यतावच्छेदकं मत्वा तादृशवाक्यप्रयोगः कर्तव्यः । व्यादानाधिकरणतदभावा धिकरणकालस्यैव संसर्गतया विवक्षितत्वात् । ननु व्याप्यव्यापकसम्बन्धावच्छेदकत्वेन वक्तृतात्पर्य्यविषयीभूत क्षणादिरूपकाल विवक्षणे मुखं व्यादाय स्वपिति, इत्यत्र दोषवारणेऽपि, अधीत्य तिष्ठति, इत्यादौ दोषः तादवस्थः एव। यतोहि देवदत्तीयनिद्रादिकाले

देवदत्तस्य स्थितेः सत्त्वात्, अध्ययनस्य चासत्त्वात् स्थितौ अध्ययननिष्ठ व्यापकतानिरूपिताव्याप्यतायाः बाधितत्वादिति वाच्यम् । निद्रादिशून्यकालिकस्थितस्यैव व्याप्यतावच्छेदक धर्मत्वेन विवक्षितत्वात् । क्त्वा द्योत्यपरिगणितसम्बन्धेषु व्यात्वस्य समानाधिकरण्यस्य च परिगणनं कृतम् । तच्च न समुचितं प्रतिभाति । न च व्याप्यव्यापकभावस्य समानाधिकरण्ये एव सम्भवेन व्याप्यत्वेनैव समानाधिकरण्य स्यैव लाभसम्भवादिति वाच्यम् । क्त्वाप्रत्ययविधायकानि नाना सूत्राणि सन्ति पाणिनीयव्याकरणे। यथा 'अलं खल्वोः प्रतिषेधयोः प्रचां क्त्वा'।[7] अव्ययेऽयथाभिप्रेताऽख्याने कृञः क्त्वाणमुलौ'[8] इति। तत्र न सर्वत्र समानकर्तृकयोः पूर्वकाले' इति सूत्रेण विहितक्त्वा प्रत्ययवत् सम्बन्धाः भाषन्ते । अतः समानकर्तृकयोः पूर्वकाले' इति सूत्रेण विहितक्त्वाप्रत्ययस्थले समानाधिकरण्यघटितमेव व्याप्यत्वं स्वीकर्तव्यमिति तात्पर्य ग्रहाय समानकर्तृकत्वरूपसमानाधिकरण्यस्यावश्यत्वात् । एवञ्च समानकर्तृकयोः पूर्वकाले' इति सूत्रविहित क्त्वास्थले समानकर्तृकत्वस्य समानाधिकरण्यस्य च संसर्गत्वमावश्यकम् । तदतिरिक्तजन्यत्वादीनां च क्वाचित्कमेव संसर्गत्वं भासते। ननु समानकर्तृकयोः पूर्वकाले' इति सूत्रेण क्त्वाप्रत्ययविधानाय समानकर्तृकत्वरूपसमानाधिकरण्यमावश्यकमिति न वक्तुं शक्नुमः, समानकर्तृकत्वरूपसमानाधिकरण्याऽभावेऽपि ''अवजानासि मां यस्मादतस्ते न भविष्यति । मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा । इति कालिदासपद्यस्य मत्प्रसूतिमनाराध्य ते प्रजा न भविष्यतीत्यर्थः । अतः आराधनानन्तरमेव प्रजोत्पत्तिरिति तात्पर्यम् । पद्येऽस्मिन, आराध्यशब्दः क्त्वाप्रत्ययान्तः, आराधना च दिलीपकर्तृकैव । भविष्यति क्रियायाः कर्ता प्रजेति । एवञ्च प्रजाकर्तृकभवनक्रियानिरूपितपूर्वकालिकत्व-माराधनायामदर्शनात् क्त्वाप्रत्ययः असम्भवः, अतः तल्लक्ष्यसाधुत्वार्थं भिन्नकर्तृकर्तृकत्वमपि स्वीकर्तव्यमिति रीत्या समानकर्तृत्वसम्बन्धोऽपि क्वाचित्कः एवेति वाच्यम् । अत्र हि समानकर्तृकत्वरूपसमानाधिकरण्यनिर्वाहाय, अनाराध्येत्यनन्तरं स्थितस्याऽध्याहारः । अध्याहृता स्थितिक्रिया विशेष्यभूता भवति । एवं रीत्या यः दिलीपः स्थितिक्रियाकर्ता सः एव दिलीपः आराधनक्रियाकर्ताऽपि विद्यते अतः समानकर्तृकत्वं सुलभमेव । क्त्वाप्रत्ययद्योत्य व्याप्यत्वसम्बन्धस्योदाहरणं ग्रन्थकृता वाक्यद्वयं दत्तम् । एकं मुखं व्यादाय स्वपिति, द्वितीयश्च अधीत्य तिष्ठति । तत्र प्रथमे वाक्ये व्याप्यत्वसम्बन्धमन्तरेणापि क्त्वाप्रत्ययस्योत्पत्तिः भवितुं शक्नोति । कथमिति चेदोच्यते – भगवता भाष्यकारेण व्यादानोत्तरमेव स्वापः स्वीकृतः, एवं सति स्वापापेक्षया व्यादानक्रियायां पूर्वकालिकत्वं स्पष्टमेव । एवाञ्चोभयोर्मध्ये पूर्वोत्तकालिकत्वरूपसंसर्गसत्त्वेन क्त्वाप्रत्ययस्योपपत्तौ तदुत्पत्तये व्याप्यत्वसंसर्गः नावश्यकः । ननु मुखं व्यादाय स्वपिति, इति वाक्ये स्वापक्रियापेक्षया व्यादानक्रियायां पूर्वकालिकत्वं प्रतिपाद्य क्त्वाप्रत्ययः साधितो वर्तते, परञ्च क्रियाद्वये आंशिकमेव पूर्वोत्तरकालिकत्वं दृश्यते, एवं सति भुक्तवा भुङ्ते, वाक्यस्यापत्तिः । यतोहि यो हि देवदत्तः भोजनं कृतवान् तत्कृते अयं वाक्यप्रयोगः । तत्रोत्तरकालिकी या भुजिक्रिया तत्भुजिक्रियानिरूपितपूर्वकालिकत्वं पूर्वभुजिक्रियायां विद्यमानत्वात् । अत्र क्रियाद्वये आंशिकस्य पूर्वोत्तर कालिकत्वस्येदमेव तात्पर्यं यत्

गलविलाधसंयोगानुकूलो व्यापारः समानः किन्तु गलविलाधः संयोगानुकूलव्यापाराधिकरणकालः भिन्न इति चेन्न। मुखं व्यादाय स्वपिति, इत्यादौ व्यादानं नाम ओष्टपुटविभागजनको व्यापारः, स च व्यपारः स्वपाव्यापारजन्य एव । एवञ्चात्र ओष्टपुटविभागजनकस्वापरूपविशेषव्यापारानन्तरं सुखविशेषजनकव्यापारान्तरमपि प्रतीयते । एवं रीत्या व्यादाने क्रमजन्मावयवसमूहरूपतत्क्रियानिरूपितपूर्वत्वं व्यादने सुलभमेव। तात्पर्यमिदमत्र वर्तते यत् स्वापकाले एव व्यादानस्य सत्वात् व्यादाने बाधकाभावः । भुक्त्वा भुङ्क्ते, इत्यादौ तत्तदधिकरणकालभेदेन क्रियद्वयमध्ये पूर्वोत्तरकालिकत्वमसत्त्वेपि क्रियान्तर निरूपितपूर्वत्वाभावान्न त्तवाप्रत्ययापत्तिः । तस्मात् व्याप्यत्वादिसंर्गानामानन्तर्यादीनाञ्च समानकर्तृकयोः, इति सूत्रे पठितपदैः वाच्यत्वालाभात् क्त्वाप्रत्ययप्रकृतिकक्रियायाः तिङ्प्रत्ययप्रकृतिकक्रियया सह यः संसर्गः तत्संर्गस्यैव द्योतकः त्तवाप्रत्ययः। नेयं कल्पना मन्निष्ठा भाष्ये तथाविधव्यारख्यानदर्शनात्। समानकर्तृकयोः[१] इति सूत्रे भाष्ये भुक्त्वा व्रजतीति वाक्यसमानार्थके पूर्वं भुङ्कते पश्चाद् व्रजति, इति वाक्ये क्त्वाप्रत्ययः कथं न भवतीत्याशङ्का समाधानमुक्तं यत् स्वशब्देनोत्तवान्न भवति । न तर्हीदानीमिदं भवति, पूर्वं भुक्त्वा ततो व्रजति इति। तत्क्रियापौर्वकाल्यम्। अस्य भाष्येदमेव तात्पर्यं यत् पूर्वशब्दोऽन्यभोजन कर्त्रपेक्षया पूर्वत्वं गमयति । ततः पश्चादित्यपि, अन्यव्रजनकर्त्रपेक्ष-मेवोत्तरत्वं प्रत्यायति। न तु क्रिययोः। क्रिययोः पौर्वापर्य्यस्यैव त्तवाप्रत्ययो द्योतकः । प्रकृते भोजनकर्त्रोः व्रजनकर्त्रोश्च पौर्वापर्य्यस्य वाचकाः पूर्वादिशब्दाः वाक्ये उपाताः, अतः यदर्थद्योतनाय त्तवाप्रत्ययः कर्तव्यः तदर्थः पूर्वादिशब्देनोक्तः वर्तते, अतो न क्त्वाप्रत्ययः। एतद्भाष्येणेदमेव ध्वन्यते यत् क्त्वाप्रत्ययः द्योत्ये एव भवति न तु वाच्ये। यतोहि समानकर्तृकयोः पूर्वकाले इति सूत्रे समानकर्तृकयोः इति पदे निर्धारणे षष्ठी सौत्रत्वात् द्विवचनम् । यतः पूर्वकालपदे पूर्वो कालः यस्येत्यर्थे बहुव्रीहिः अतः पूर्वकालिकव्यापारवाचकः अर्थः तथा च पूर्वकालिकव्यापारे विद्यमानात् धातोः तद्योत्ये त्तवाप्रत्ययः इति सूत्रार्थो फलति।

एतद्विषये कश्चिदेवं वदति यत् समानकर्तृकयोः इति सूत्रे समानकर्तृपदं न धर्मिपरम्, अपितु धर्मपरम् , समानकर्तृकत्वरूपस्य धर्मस्यैकत्वेऽपि क्रिया रूपधर्मिगतद्वित्वस्यारोपेण द्वित्वप्रतीतिसम्भवे द्विवजनोत्पत्तावपि न कश्चित् प्रतिबन्धकः। सूत्रे समानशब्दः एकार्थकः, तथा चैककर्तृकर्तृकत्वं समानकर्तृकत्वम्। पूर्वकालिक क्रियायाः निरूपितत्वसम्बन्धेने प्रथमे कर्तृव्येऽन्वयः । एवं सति भुक्त्वा व्रजतीति वाक्यस्य भोजनादिक्रियानिरूपितकर्तृत्वाऽश्रयाभिन्नकर्तृवृत्तिव्रजनादिक्रिया इति बोधः । यदि समानकर्तृकत्वं त्तवाप्रत्ययवाच्यं न स्यात् तदा अहमोदनं पक्त्वा भोक्ष्ये, इति वाक्ये कर्तृवाचकात् युष्मद्पदात्तृतीयापत्तिः कथमिति विचारयामि । वाक्येऽस्मिन् क्रियाद्वयं श्रूयते, पाकक्रिया भुजिक्रिया च। तत्र पच्धात्वर्थव्यापारजन्यफलस्य विक्लितेः आश्रयत्वादोदनस्य कर्मसंज्ञा, भुज्धात्वर्थक्रियाश्रयत्वात् युष्मच्छब्दः कर्तृसंज्ञकः सिद्धान्ते भवति, अतः वाक्यस्य साधुता सम्पन्ना भवति । क्त्वाप्रत्ययस्य समानकर्तृकत्वाऽभावे भुज्धात्वर्थक्रियानिरूपितकर्तृत्व-स्योक्तत्वेपि पच्धात्वर्थक्रियायानिरूपितकर्तृत्वस्योत्त्वाभावात् तृतीयापत्तेः। समानकर्तृकत्वं

यदा क्त्वाप्रत्ययवाच्यं भवति तदा उभयोरेककर्तृकत्वेन भोजनक्रियाकर्तुरस्मदर्थस्यैव पाकक्रियाकर्तृतया भोजनकर्तृरभिधाने पाककर्तुरप्यभिहित त्वेन तृतीयायाः अप्रसङ्गात् । अत्रेदं तात्पर्यं ज्ञातव्यम् – ओदनं पक्त्वा भोक्ष्ये, इति वाक्ये क्रियाद्वयं तु श्रूयते, एव। एका पच्धात्वर्थाक्रिया, अपरा च भुज्धात्वर्थाक्रिया। यन्मते समानकर्तृकत्वे त्तवाप्रत्ययो भवति तन्मते यथा तिङ्प्रत्ययेन कर्ता उक्तो वर्तते, तथा क्त्वाप्रत्ययेनापि, अतः कर्तृवाचकात् युष्मच्छब्दात् तृतीयायाः प्रसङ्गो नास्ति । किन्तु यन्मते संसर्गे एव क्त्वाप्रत्ययः तन्मते भुज्धात्वर्थक्रियानिरूपितकर्तृत्वस्य तिङ्प्रत्ययेनोवत्तत्वेऽपि पच्धात्वर्थक्रियानिरूपित-कर्तृत्वस्योक्तत्वाभावात्, तृतीयप्रसगङ्गः । यदपीदमुक्तं यत् 'अनभिहिते' इति सूत्रे नञ्त त्पुरुषस्य प्रसज्यप्रतिषेधः अतः अभिहिते न भवतीत्यर्थरीत्या केनाभिहितेति नियमाभावात् प्रकृतवाक्ये त्तवाप्रत्ययेन कर्तुरनभिहितत्वेपि तिङप्रेत्ययेन कर्तुरभिहितत्वात्तृतीया न भविष्यतीति तदि न समीचीनं यतोहि प्रसज्यप्रतिषेधाश्रयणे नञर्थस्य भवनक्रियान्वयितयाऽभिहितपदार्थेनाऽन्वयाभावादसमर्थसमासः स्वीकार्यः अतो लाघवात् पर्युदासः एवाश्रयणीयः । पर्युदासपक्षे अभिहितभिन्ने कर्त्रादौ तृतीयादयः इत्यर्थसम्पत्या अनभिहितभुज्क्रियाकर्तरि तृतीयायाः दुर्वारत्वापत्तेः । न च पर्युदासपक्षे लाघवसत्त्वेऽपि, वाक्यस्य साधुता सम्पादनाय प्रसज्यप्रतिषेधः एव स्वीकरणीयः इति वाच्यम् । प्रकृतसूत्रभाष्यविरोधात् पर्युदासः एव स्वीकरणी यत्वात् । तत्र भाष्यकारेण पूर्वं प्रसज्यप्रतिषेधं मत्वा विचारितं यत् प्रासादे आस्ते, इत्यत्राधिकरणस्योत्तवात् कथं सप्तमी । अस्येदेव तात्पर्यं यत् प्रसीदन्त्यस्मिन्निति विग्रह अधिकरणे धञ्प्रत्ययः 'उपसर्गस्य घञ्मनुष्ये बहुलम्' इति सूत्रेणोपसर्गस्य दीर्घः। अत्र हि सदिप्रत्ययेनाभिहितमधिकरणमिति कृत्वा सप्तमी न प्राप्नोति नवा एष दोषः, अन्यतरेणानभिधानात् । सदिप्रत्ययेनाभिधानमासिप्रत्ययेना-नभिधानम्। यतोऽनभिधानं तदाश्रया सप्तमी भविष्यति। अत्र सप्तम्पुपपादनपरभाष्यस्य संङ्गतिः पर्युदासपक्ष एव सम्भवेन त्तवाप्रत्ययस्य कर्तृवाचित्मावश्यकमिति मतमपि न समीचीनम् । 'समानकर्तृकयोः क्रिययोः पूर्वकाले त्तवा, इत्यर्थकेन 'समानकर्तृकयोः' इति सूत्रात् कर्तृत्वस्य वाच्यत्वाऽलाभात्। अन्यथा, समानकर्तरि, इत्येव सूत्रन्यासः कुर्यात् पाणिनिः किन्तु न तथा कृतम् , अतः त्तवाप्रत्ययेन द्योत्यः संसर्गः एवार्थः समुचितः।

क्त्वाप्रत्ययेन द्योत्यः संसर्गः एव भवतीति सिद्धान्तस्वीकारे, अहमोदनं पत्तवा भोक्ष्ये' इति वाक्ये प्रधानक्रियानिरूपितकर्तृव्यस्य तिङ्प्रत्ययेनोक्तत्वेऽपि गौणक्रियाक्रियानिरूपतिकर्तृत्वस्योत्तवाभावात् कथं न कर्तृवाचकात् युष्मच्छव्दात्तृतीया भवतीति विचारणायामियं समाधिर्ज्ञातव्या भवति यत् –

**प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् शक्तिर्गुणाश्रया तत्र प्रधनमनुरुद्यते।**

**प्रधानविषयाशक्तिः प्रत्ययेनाभिधीयते। यदा गुणे तददा तद्वदनुक्ताऽपि प्रतीयते।।**[10]

अस्येदं तात्पर्यं यत् – एकस्मिन्नेव वाक्य एकस्य द्रव्यस्य यदा क्रियाद्वयं भवति, एका प्रधानक्रिया, अपरा च गौणक्रियाय, तत्र प्रधानक्रियानिरूपिता या शक्तिः तद्बोधिकैव विभक्तिः भवति। प्रधानक्रियावाचिनो धातोरुत्पन्नेन प्रत्ययेन यदा प्रधानक्रियानिरूपिता शक्तिरभिधीयते

तदा गुणक्रिया विषया शक्तिः साक्षादनुक्ताऽपि, उक्तवत्प्रकाशते। अपि च प्रधानशक्तिरनुक्ता चेत् तदा गुणाश्रया शक्तिरुक्ताऽपि अनुक्तावत्प्रतीयते। अहमोदनं पक्त्वा भोक्ष्ये'' इति वाक्ये, पच्धात्वर्थक्रिया गौणीभूता, भुज्धात्वर्थक्रिया च मुख्या । यतः प्रधानभुज्धात्वर्थक्रिया निरूपितं कर्तृत्वमुक्तं वर्तते अतः गौणपच्धात्वर्थक्रियानिरूपितकर्तृत्वस्यानुक्तत्वेऽपि, उक्तवदेव भवतीति कृत्वा न अहमोदनं भाक्ष्ये' इति वाक्ये कर्तृवाच्कात् युष्मच्छब्दत्तृतीया प्रसङ्गः । यदि सिद्धान्तोऽयं न स्वीक्रियते तदा मया पक्त्वौदनो भुज्यते, इति वाक्यघटकोदनशब्दात् द्वितीयायाः वारणमसम्भवमेव स्यात्। अपि च निरुक्तसिद्धान्तस्वीकारे भुक्त्वा, स्नात्वा, पीत्वा, गतः इत्यादीनि वाक्यानि संगच्छन्ते । यतोहि यत्र प्रधानीभूता क्रियैका भवति, अप्रधानीभूताश्च बह्व्यः तत्र सर्वाः पूर्वकालिकाः क्रियाः प्रधानीभूतक्रियायामेव विशेषणतयाऽन्वयं लभन्ते, न तु परस्परम्, गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्, इति न्यायात्।

**निष्कर्षः**

प्रबन्धेऽस्मिन् मया समानकर्तृकयोः पूर्वकाले, इति सूत्रमुद्दिश्य क्त्वाप्रत्ययार्थः विचारितः, किन्तु विचारोऽयं न सम्पूर्णतामेति, यतोहि क्त्वाप्रत्ययविधायकानि नाना सूत्राणि लसन्ति पाणिनीयव्याकरणे, नहि समैः सूत्रैः एकस्मिन्नेवार्थे क्त्वाप्रत्ययानां विधानं भवति, अन्यथा एकेनैव सूत्रेण कार्यनिर्वाहसम्भवे सूत्रान्तराणां वैय्यर्थापत्तिः । एकस्मिन् निबन्धे सर्वसूत्रविहितानां क्त्वाप्रत्यार्थानां विचारोऽपि न सम्भवति गौरवभयात् । अपि च व्यक्तिविवेक 'विपच्य घटो भवति' इति वाक्ये कां पूर्वकालिकीं क्रियामादाय क्त्वाप्रत्ययः, इति विचारणीयो विषयो वर्तते, यो विषयो मया निबन्धेऽस्मन् नोपस्थापितः । अपि च कृत्प्रत्ययप्रकृतिकेन उपस्थापिता या क्रिया तिङ प्रत्ययेनोपस्थापिता या क्रिया तयोः क्रिययोर्मध्ये का क्रिया अन्तरङ्गा का च बहिरङ्गा, इत्यपि विषयः विचारणीयः । व्याकरणे, अन्तरङ्गक्रियानियामकं मूलं किम् , शास्त्रान्तरे तन्नियामकं किमति विषयोऽपि विचारणीयः, किन्तु विस्तारभिया, एषु एकोऽपि विषयो न विवेचितो वर्तते, अतः अस्यैव निबन्धस्य द्वितीयभागे, एतेषां सर्वेषां विषयाणामुपरि विचारान् करिष्यामि, इति शम्।

**सन्दर्भाः**

1. प्रत्येकार्थ, आनन्दमाया, इति टीकाद्वयसमलंकृत वाक्यपदीय ब्रह्मकाण्ड कारिका संख्या 127 प्रकाश,क मन्दाकिनी संस्कृत विद्वत्परिषत् दिल्ली
2. वाल्मीकि रामायण सुन्दरकाण्ड
3. पञ्चदशी
4. समानकृतकोः पूर्वकाले
5. तत्त्वदर्शिनीटीका समलंकृत वैय्याकरणभूषणसार ''अभेदैकत्वसंख्यानिर्णयप्रकण, पृ. 605 प्रकाशन वेंकटेश वैदिक विश्वविद्यालय, तिरुपति
6. पा.सू. 3-4-17
7. तत्त्वदर्शिनीटीका समलंकृत वैय्याकरणभूषणसार ''क्त्वाप्रत्ययार्थनिर्णयप्रकण, पृ. 605 प्रकाशन वेंकटेश वैदिक विश्वविद्यालय, तिरुपति
8. पा.सू. 3-4-18 9. पा.सू. 3-4-59 10. पा.सू. 3-4-21 11. वाक्यपदीय

UGC - CARE Listed

**पाणिनीया**
Vol. XXX, Year IX

# संस्कृतसाहित्ये वैज्ञानिकशलाकाः

**डॉ. रमादेवी वी.***

**उपोदधातः**

भारतीय संस्कृतेः आधारः संस्कृताश्रितः भवति। वेदकालादारभ्य देववाण्या एव सर्वप्रकारकाः रचनाः जाताः। भारतस्य वा संस्कृतभाषायाः वैशिष्ट्यं नाम अस्मिन् राष्ट्रे अनया भाषया निघण्टुतः आरभ्य वैज्ञानिकशास्त्रपर्यन्तं काव्यरूपेण निबद्धाः इति। एकोनविंशति शताब्दौ आंग्लपण्डितैः तथा केचन भारतीयैः संशोधकैः (K.N. Bhandarkar इत्यादि) कृतेन प्रयत्नेन बहवः हस्तलिखितग्रन्थाः संग्रहीताः संरक्षिताः च। अन्यथा चित्राणि परिवर्तनानि स्युः।

संस्कृतभाषायाः विषये प्रचलितः भ्रमः यत् एषा भाषा केवल धार्मिक विषयाणां प्रतिपादनार्थम् उपयुक्त इति। तथा नास्ति इति वयं शास्त्राध्ययनेन अवगन्तुं शक्नुमः। वस्तुतः आहत्य संस्कृतसाहित्यं यत् अस्ति तस्य 5% एव धार्मिकविषयाः, अवशिष्टः 95% साहित्यस्य तु धार्मिकसंबन्धः एव नास्ति। तत्र तु तत्वचिन्ता, नियमः, विज्ञानं, साहित्यं, वैयाकरणं, शब्दविज्ञानं, भाष्यम् इत्यादि विषयाः चर्चिताः दृश्यन्ते। संस्कृतभाषा अस्माकं तत्वचिन्तकानां, वैज्ञानिकानां गणितज्ञानां कवीनां, नाटककाराणां, वैयाकरणानां, न्यायकोविदानां च भाषा अस्ति। उदाहरणाय व्याकरणे पाणिनिः, पतञ्जलिः, ज्योतिषशास्त्रे तथा गणिते आर्यभट्टः, ब्रह्मगुप्तः तथा भास्करः प्रसिद्धाः सन्ति। अपि च तत्वचिन्तायां गौतमः (न्यायशास्त्रम्) अश्वघोषः (बुद्धचरितम्), कपिलः शङ्कराचार्यः इत्यादि।

पाणिनेः पूर्वं तथा अनन्तरम् इति सम्पूर्ण संस्कृतसाहित्यस्य द्विधा भेदः। वैदिकसाहित्यं तथा लौकिकसाहित्यम् इति तत्प्रसिद्धम्। वस्तुतः 1% एव साहित्यं वैदिकम् 99% संस्कृतसाहित्यं पाणिनेः परम्। अष्टाध्यायी रचनानन्तरं भाषायां तावत् परिवर्तनानि न

* ऐसोसिएट प्रोफेसर, डिपार्टमेंट ऑफ संस्कृत, महाराजा कॉलेज, एरनाकुलम्

जातानि यत् कात्यायनेन वार्तिकेषु वा पतञ्जलिना भाष्ये यदुक्तं तद्विहाय संस्कृतस्य वैज्ञानिकता वर्णमालातः एव अवगन्तुं शक्नुमः । आंग्लेय वर्णमाला A-Z पर्यन्तं काऽपि तर्कशुद्धता वा युक्तिपरता वा न। तत्र F अनन्तर G अथवा P अनन्तरं Q इति निर्दिशे प्रमाणमेव नास्ति। संस्कृतवर्णमालायां तथा न। प्रथमं स्वराणां तदनन्तरं व्यञ्जनानां च प्रपञ्चनं प्रामाणिकं दृश्यते । स्वराणां विवरणे अकारादारभ्य कण्ठ-तालु-मूर्घा-दन्त-ओष्ठ इति क्रमानुगतत्वं अपि च कवर्ग-चवर्ग-टवर्ग-तवर्ग-पवर्ग क्रमः च सयुक्तिकमेव।

वैज्ञानिकसाहित्यविषये प्रतिपादनात् पूर्वं षड् आस्तिकदर्शनानां तथा त्रीणि नास्तिकदर्शनानां च योगदानम् अविस्मरणीयमेव । सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसा (वेदान्ताः) इति आस्तिकानि दर्शनानि तथा चार्वाक-बौद्ध-जैन इति नास्तिकदर्शनानि । पूर्वोक्त आस्तिकदर्शनेषु प्रमाणविचाराः अणुवादः, पुरुष-प्रकृति संकल्पः सृष्टिः शारीरिकं मानसिकं स्वास्थ्यं, यज्ञकर्मणि, ब्रह्मज्ञानम् इत्यादि विषयेषु चर्चाः कृताः । तत्वदर्शने द्वे शाखे प्रधाने Ontology and Epistanology Ontology इत्युक्ते अस्तित्वविषये अध्ययनं तथा माया विचार । Epistenology इत्युक्ते प्रमाणविचारः । विश्वदार्शनिकक्षेत्रे प्रत्यक्ष-अनुमान-उपमान-शब्द-अर्थापत्तिः - अभाव इति प्रमाणानां चिन्तनम् इतः एव जातः।

संस्कृतसाहित्ये विज्ञानं किम् अस्ति ? इति विषये चिन्तनं पूर्वं अत्र एकः Data base विषये किञ्चित् प्रतिपादितुम् इच्छामि। तस्य नाम इति। तस्य पूर्णनाम General Information System Terminal इति NIC इत्यस्य National Informatics Centre इति । e-Governanace इति तेषां विषय5 हैदराबाद केन्द्रिता संस्था एष। तस्मिन् जालपुरे पारम्परिक विज्ञानस्य विषये एकः विभागः अस्ति । तत्र संस्कृतसाहित्यस्य दशविभागाः सन्ति तेषु प्रत्येकस्य दश-दश उपविभागाःसन्ति, एवं आहत्य 100 पृथक् उपविभागेषु संस्कृतसाहित्ये वैज्ञानिक विषयाः के ? इति प्रत्यपादीत्। इतः अवगन्तुं शक्यते यत् भारते अस्माकं पूर्विकानां विज्ञानदृष्टिः कीदृशी आसीत् इति। तेषु कांश्चन अंशान् वयं पश्यामः। संस्कृत तथा स्वास्थ्यम् WHO (विश्व स्वास्थ्य संघठन) द्वारा 1948 मध्ये स्वास्थ्यस्य विवरणम् एवं कृतम् - Health is a state of complete Physical mental and social will being and not anerely the absence of disease or infirmily. अस्मिन् विवरणं केवलं शशिरस्य भौतिकस्वास्थ्यस्य प्राधान्यता दृश्यते। मनसः विषये उल्लेखः नास्ति। अनन्तरं 1970 तथा 1980 मध्ये पुनः विवरणस्य परिष्कारः कृत - तत्र बौद्धिक-पर्यावरण-आत्मीय स्वास्थ्यबिन्दूनामपि उल्लेखः आगतः । एतदेव सहस्रेभ्यः वर्षेभ्यः पूर्व आयार्येण सुश्रुतेन स्वस्थ सुश्रुतसंहितायां अनयारीत्या प्रतिपादितम्।

**समदोषः समाजिक्य समाधातुमलक्रियः।**
**प्रशन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयत।।**

अस्मिन् श्लोके प्रथमपादे शरीरसंबंधी विवरणं तथा द्वितीय पादे तु आत्मीय-

तात्विक-मानसिक स्वास्थ्यानामपि विवरणं दृश्यते। भारतीयानां चिन्तनं कियद् समग्रमासीत् इत्यस्य निदर्शन-मात्रमेतदस्ति।

संस्कृतं नाम गणितशास्त्रम् - गणितक्षेत्रे तथा ज्योतिशास्त्रे च भारतीयानां योगदानम् अतुल्यमेव । उदाहरणाय बुक्कस्य राजधान्यां सायणः मन्त्रीः आसीत् । 14 शताब्दौ सः प्रकाशवेगस्य गणनां कृतवान् यत् अर्धनिमेषे 2202 योजना इति। ऋग्वेदे अपि उदाहरणानि सन्ति। योजनानां सहर्स द्वे द्वे शते द्वे च एकेन। योजना निमिषार्धेन क्रमेण नमोस्तु ते,

1 Kose = 8000 British yard.

1 Britis yard = 0.914 meters

| | | |
|---|---|---|
| Therefore 2202 योजना | - | 2202x8000x0.9144 |
| | = | 6443228.1 mlas |

श्रीमद्भागवते निमेषस्य विवरणमेवास्ति -

| | | |
|---|---|---|
| 15 निमेषः | = | 1 कष्टः |
| 15 कष्टः | = | 1 लघुः |
| 30 लघुः | = | 1 मुहूर्तः |
| 30 मुहूर्तः | = | 1 दिवा-रात्रि |

एतस्य आधारेण समयस्य वेगः इत्येतद् आधुनिकालेन संगणकद्वारा निर्दिष्टगणनायाः समीपे एव वर्तते। एवं वैदिक गणित क्षेत्रामपि आश्चर्यकश्मेव।

तथा ज्योतिशास्त्रम् –

भारतीय सिद्धान्तानुसरां प्रपञ्चस्य 80 लक्षपर्यन्तति इति वर्तते । अत्र सांख्यविषयक-ज्ञानम् उपलभ्यते। 3000 BC मध्ये रचिते शतपथब्राह्मणे चन्द्र-रोहिणीनक्षत्र सम्बन्धे वर्णनमस्ति । महाभारतग्रन्थे द्विशताधिक ज्योतिशास्त्र महाभारतयुद्धस्य त्रयोदशे दिवसे द्वयोः ग्रहणयोः उल्लेखः अस्ति । तदनन्तरग्रहणं तु 36 वर्षानन्तरं कृष्णः यदा द्वारकायामसीत् तदा अभवत् इति सूचना अस्ति । एवं वराहमिरिस्य, आर्यभट्टस्य तथा भास्कराचार्यस्य च ग्रन्थेषु ज्योतिशास्त्रसंबन्धीनि प्रतिपादनानि द्रष्टुं लभ्यते।

**संस्कृतं तथा प्रबन्धशास्त्रम्**

भगवद्गीतायाः दैवासुरसम्पद्धिभाग योगे 'आसुरी सम्पत्' इति रूपेण प्रबन्धशास्त्रस्य दोषान् उक्तवा 'देवी सम्पत्' इति रूपेण उत्तम प्रबन्धस्य लक्षणानि प्रतिपादितानि।

**अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौवधम्।**
**अयोग्यः पुरुषो नास्ति, योजकतत्र दुर्लभः।।**

एषः श्लोकः प्रबन्धनशास्त्रस्य प्राथमिकं तत्वं प्रतिपादयति। भगवद्गीतायाः तृतीये अध्याये कर्मयोगे अपि लोकसंग्रहार्थं कथं कार्यं करणीयमिति प्रत्यपादयत् । अपि च प्रश्नोपनिषदि अपि प्रबन्धनशास्त्रस्य तत्वानि सन्ति। इत्यादि विषयाः प्रश्नोपनिषदि तृतीये

अध्याये गुरुः प्राण-अपान-व्यान-उदान समान विवरणेन सह पठामः चेत् वयम् अवगन्तं शक्नुमः यत् विकेन्द्रीकरणसम्बन्धी अस्मदीयाः धारणाः कियन्त्यः पुरोगामिन्यः आसन् इति। संगणकक्षेत्रे अपि Theortical Computer Science (TCS) कृते महर्षिणः पाणिनेः अष्टाध्यायी उपयुक्ता इति संगणक ज्ञैः प्रोक्तम् । Software development कृते संस्कृतव्याकरणे विद्यमानाः Phonotics, Phonology and Norphology सिद्धान्ताः महदुपकारकाः सन्ति। डॉ. पी. रामानुजः CDAC, डॉ. लक्ष्मी तानाचार, संस्कृत अकादमी, मेलुकोट्टै, Dr. John Backus. IBM इत्यादयः अस्मिन् विषये प्रमाणानि।

संस्कृतं तथा पशुचिकित्साविषये अपि भारतस्य योगदानम् अप्रतिममस्ति । डॉ. कृष्णस्वामी इति Civil Vetinary Dept. प्रमुखः, तस्य विविध लेखेषु बुद्धकालादारभ्य अस्मिन् शास्त्रे किं किं जानम् इति संशोधनफलानि प्रकाशयत् । तस्य लेखाः नाम्ना 'The Vetinary Science in India, Ancient and Modern, with special Reference to Tuberculosis, Vetinary Surgery and Surgical Instuments of Ancient India' प्रसिद्धाः । सन्ति । अस्मिन् क्षेत्रे शान्तिहोत्रः (अश्वायुर्वेदः) पलाकाण्यः (गजशास्त्रम्), रजपुत्रः, वैशम्पायनः, व्यासः, नकुलः, सहदेवः, गार्ग, मृताशर्मन्, बृहस्पतिः, नारदः, गणः, जयदत्तसूरी इत्यादयः प्रसिद्धाः ग्रन्थकर्तारः सन्ति।

**उपसंहारः**

उपरि प्रतिपादिताः विषयः तु केवलम् उपलक्षणमात्रमेव। अन्येऽपि विषयाः बहवः सन्ति। एतैः विषयैः संस्कृतक्षेत्रे इतोऽपि अध्ययनस्य वा संशोधनस्य क्षेत्राणि विशालानि सन्ति एव। संस्कृतशिक्षकैः आग्रहेण सह Interdesciplinary संशोधनानि अस्मिन् क्षेत्रे अत्यन्तम् अपेक्षितानी सन्ति। तदर्थं सर्वैः प्रयत्नः विधेयताम् इति शम्।

**सन्दर्भाः**

1. Krishnamacharyar M. Histroy of Classical Sanskrit Literature, Motilal Banarasidas, Delhi 1974
2. K.V.Sarma, A History of the Kerala School of Hindu Astronomy,VVRI, Hoshiarpur, Punjab University.
3. Ed . KG.Paulose,Scientific Heritage of India,GSCC,Tripunithura.
4. Ed.R.C.Majumdar,The History And Culture Of The Indian People., Bharatiya Vidya Bhavan, Mumbai.

UGC - CARE Listed

**पाणिनीया**
Vol. XXX, Year IX

# वैदिकजीवनचर्या चिकित्सापद्धतिश्च

**डॉ. संकल्पमिश्र***

**सार**

सुप्रथितं हि लोके सर्वं वेदात् प्रसिद्ध्यति वचनस्यैतस्य सार्थक्यं परमं विद्यते। वेदस्य षडंगुषु कल्पाख्यमेकमंगम् यस्मिन् विषये आचार्यैः विष्णुमित्रैः उक्तं – कल्पो वेदविहितानां कर्मणाम् आनुपूर्व्येण कल्पनाशास्त्रम्। कल्पनाशास्त्रेषु श्रौत-गृह्य-धर्म-शुल्बादीनि सूत्राणि गण्यन्ते। केचन विद्वासः पितृमेध-प्रवरसूत्रे अपि अत्रैव गण्यन्ते।

वैदिकसाहित्यस्य विस्तारः नास्त्यल्पः अतः भिन्न-भिन्नविषयानुगुणं वेदस्य तत्सम्बद्धसाहित्यस्य अपि वैविध्यं वर्तते। गृह्यसूत्रेषु गृह्यकर्मणामुल्लेखः दृश्यते येषां सम्पादने गृह्याग्निः अपेक्ष्यते तथापि अत्र चिकित्सासम्बद्धविषयाः अपि दृश्यन्ते यथा शुक्लयजुर्वेदस्य पारस्करगृह्यसूत्रे एका कण्डिका शीर्षरोगभेषजमिधकृत्य प्राप्यते। अत्र कथं शिरसि विद्यमानस्य रुजः निराकरणं क्रियते मन्त्रेण, अभिमन्त्रिताभिः अद्भिः एतत् सर्वं विज्ञापितम्। एवमेव शिक्षाग्रन्थेष्वपि सम्यकत्या मन्त्रोचारणाय भोजनं कीदृशं स्यात्? दिनचरी कथं स्यात्? एते सर्वे विषयाः दृश्यन्ते। मधुप्रयोगः कथं करणीयम्? किं भक्षणीयम्? किं न भक्षणीयम्? कदा भक्षणीयम्? एतत् सर्वं विचारितम्। ओषधेः प्रयोगः कदा स्यात्? कथ स्यात्? एते सर्वेः विषयाः तत्र प्राप्यतन्ते।

बुद्धिः स्मृतिः वा विवर्द्धनाय किं करणीयम्? एतदपि वेदे वैदिकसाहित्ये वा प्राप्यते। रुजामतिरिच्य कस्यापि मनुष्यस्य व्यवहारः कथं समीचीनां भवेत् एतदपि सुष्ठुतया ज्ञापितम्। **उतूहपरिमेह**प्रकरणे दुर्विनीतदासस्य कथं मनोवैज्ञानिकमुपचारः कुर्वन् तस्य व्यवहारे कार्ये वा परिवर्तनं कर्तुं वयं शक्नुमः, ज्ञापितम्।

*सहायकाचार्यः वेदव्याकरणविभागः, महर्षिपाणिनिसंस्कृत-एवं-वैदिकविश्वविद्यालयः, उज्जैनम्

संस्काराणां सम्पादनप्रसंगे कथं वनस्पतिप्रयोगेण वयं स्वास्थ्यलाभकर्तुं वयं शक्नुमः, विचारितम् । वस्तुतः वैदिककालीनदिनचर्यावशात् रुजाम् उत्पत्तिरेव न भवितुं शक्यते तथापि यदि स्यात् तस्यापि निराकरणाय साधनानि आसन् । मधुपर्कवि धिप्रसंगे कथं केषां द्रव्याणां मेलनेन मधुपर्क इति संज्ञा तस्य द्रव्यस्य भवति ? कियती च मात्रा स्यात् ? ग्रहणं कदा कर्त्तव्यम् ? कथं कर्त्तव्यम् ? सर्वं सुप्रसंगमुपस्थापितम्।

लोके आयुर्वेदशब्दस्य श्रवणेन झटिति सर्वेषां मुखे त्रिफला इत्यस्य नाम स्वयमेव आयाति । त्रिफलाभक्षणेन को लाभः । कीदृकोषधेः ग्रहणं न कर्त्तव्यम् ? दन्तधावनं केन साधनेन कर्त्तव्यम् ? एतेः सर्वे विषयाः वैदिकसाहित्यस्य अवलोकनेन ज्ञायन्ते।

ब्रह्मचारी कथं स्यात् ? तस्य दैनिकजीवनं कथं भवति ? वस्तुतः एतेषा सर्वेषां विषयाणां पृष्ठे महती वैज्ञानिकता दूरदर्शिता च विद्यते । अनेनैव पुराकालीनजनाः बहुविधमन्त्राणां स्मरणकर्तुं प्राभवन्।

वस्तुतस्तु सर्वविधलोकोपकारकता वेदे अस्ति तथापि वेदज्ञानाभावे जनाः तस्य लाभाः प्राप्तुकर्तुं न शक्नुवन्ति । वेदाध्ययने प्रवृत्यनुदयात् , अनेन जनानां प्रवृत्तिः साक्षात्फलदर्शनेन कदाचित् स्यात् इति धिया लोकजागरणाय सर्वसारतया ज्ञापितः केचित् चिह्नितविषयाः।

**भूमिका**

भारतवर्षप्रसंगे अस्माकं पूर्वजाः दीर्घायुष्यवन्ताः आसन् एतत् सुप्रतिष्ठितम् । तेषां स्मरणशक्तिः कीदृशी एतदपि सर्वे जानन्त्येव । कथं वेदमन्त्राणां संरक्षणं तैः समपादितं येन अद्यावधिपर्यन्तं तथैव मन्त्राणामुच्चारणं क्रियते यथा पुराकाले क्रियते स्म । एतादृक्शक्तेः विकासः उद्भवो वा स्वयमेव न जायते अपितु एतस्य विकासाय सुनियन्त्रिता व्यवस्थिता दिनचर्या अथ च चिकित्सापद्धतिश्च आवश्यकी । कस्यापि रुजः मूलमन्विष्य तस्य कृते सम्यक्प्रयत्नेन (तत्शमनाय आवश्यकेन आहार-विहाराद्याचरणेन) सम्यक्औषधिसेवनेन च सर्वं नियन्त्रितं भवति। अत एव अस्माभिः तस्याः जीवनचर्यायाः चिकित्सापद्धतेश्च विषये अवगम्य ज्ञातव्यं येन जगत्कल्याणं स्यात्।

वैदिकजीवनचर्यायाः भागद्वयं कर्तुं शक्यते – विवाहात् प्राक् , विवाहानान्तरं च। मानवजीवने बहवः संस्काराः मनुष्यैः क्रियन्ते तेषु विवाहात् प्राक् क्रियमाणानां संस्काराणां बाहुल्यं दृश्यते। वस्तुतः संस्कारसम्पादनेन तस्य शरीरे, व्यवहारे चिन्तने च परिष्कारः जायते। यथा – उपनयानान्तरं बालः दैनिकव्यवहारे संस्कृतो जायते संध्यावन्दनम् , शौचाचारसम्पादनं तेन सम्यक्तया क्रियते अथ च वेदाध्ययनमपि कर्तुं प्रभवति । अस्तु कतिपयविषयाः सन्ति येषां विषये वैदिकजीवनचर्यामधिकृत्य ज्ञास्यामः -

1. **आधानम् :** आधानाम् द्विविधम् स्मार्त-श्रौतभेदात् । अत्र श्रौतधानाय पूर्वं स्मार्ताधानाम् आवश्यकम् । अथ च स्मार्ताधानाय पुरुषस्य सभार्यत्त्वमनिवार्यम् ।[1] वस्तुतः

सभार्यस्य एव आधाने अधिकारः[2]। अतः सर्वप्रथमः विवाहः स्यात् तदन्तरं चतुर्थी कर्म स्यात्। प्रसिद्धं हि यत् चतुर्थीकर्मसम्पादनन्तरं हि विवाहितायाः भार्येति संज्ञा जायते अतः सभार्यत्वाय चतुर्थीकर्मणः अनिवार्यत्वमुक्तम्। आवसथ्याधानं नाम स्मार्ताधानस्य एवं च एषा प्राथमिकी योग्यता विद्यते श्रौताधानस्य[3]। श्रौताधानान्तरं मनुष्यः यत्कर्म करोति सायंप्रातराहुतिप्रदानात्मकं तत् कर्म अग्निहोत्रत्वेन प्रसिद्धम्। उभयविधाधानसम्पादनाय आवश्यकमेतत् यत् आहिताग्निः सर्वदा प्रातःकाले जागरणं कुर्यात्। अथ च कालानुगुणं कर्त्तव्यानुगुणं च प्रातः कालस्य आधानसम्बद्धेतिकर्त्तव्यातानां पालनं विदध्यात्। यदा मनुष्यः प्रत्यहं आहिताग्निः सन् इतिकर्त्तव्यतां निष्पादयति तदा तस्य दिनचरी स्वयमेव नियमिता भवति। अनेन प्रत्यहं नियमेन शयनम्, जागरणम्, स्नानम्, सन्ध्यावन्दनम्, होमः, भोजनम् इत्यादीनि सर्वाणि कार्याणि भवन्ति। अनेन सः स्वास्थ्यलाभः प्राप्यते। परान्नाभक्षणेन तस्य बुद्धौ अपि निर्माल्यं भवति। भोजने दूषणाभावेन स दीर्घायुष्यं प्राप्य निरोगी भवति।

2. **ब्रह्मचर्यरणम्** : उपनयनानन्तरं उपनीतबालकस्य ब्रह्माचारीति संज्ञा जायते। अत एव एतत् परमावश्यकं यत् तेन ब्रह्मचारिधर्माः आचरणीयाः4। अनेन आचरणेन सः मेधावी, निरोगी, स्वस्थः च भवति। ब्रह्मचर्याश्रमस्य बहवः नियमाः सन्ति येषां पालनेन तस्य आयुष्यं वर्द्धते। यथा प्रत्यहं भिक्षाचरणम्, स्निग्धभोजनम्, त्रिफलासेवनम्, न्यूनशयनम्, प्रातःकाले समयेन जागरणम्, अत्यल्पभोजनम् एवं विधानि बहूनि कार्याणि सन्ति येषां पालने कठिन्यं भवति किन्तु अनेन तस्य जीवने आयुष्ये च दार्ढर्यम् आयाति। सदृढः सन् स रोगी न भवति। विद्वावान् भवति, विद्यागमनेन स प्रथितयशस्कः भवति। याज्ञवल्यकशिक्षायामुक्तं यत्

**त्रिफलां लवणाक्तां वै भक्षयेच्छिष्यकः सदा।**
**क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा॥38॥**

इत्थं त्रिफलाभक्षणस्य लाभाः प्रतिपादिताः यत् अनेन मेधावृद्धिः जायते स्वरोच्चारणे सारल्यं भवति। आयुर्वेददिशा तु जनाः त्रिफलां स्वीकुर्वन्त्येव। एवमेव दन्तधावनविषये अपि तत्रोक्तम्–

**आम्रपालाशविल्वानामपामार्गशिरीषयोः।**
**वाग्वतः प्रातरुत्थाय भक्ष्येत् दन्तधावनम्॥35॥**
**खदिरं च कदम्बं च करवीरकरंजकौ।**
**सर्वे कण्टकिनः पुण्याः क्षीरीणश्च यशस्विनः॥36॥**

केन साधनेन दन्तधावनं स्यात्, तस्य को लाभः सर्वं प्रतिपादितम्। वेदपाठिना/ ब्रह्मचारिणा वा कथं भोजनं कर्त्तव्यमेतदपि ज्ञापितमत्र–

**अन्नव्यंजनयोर्भागौ तृतीयमुदकस्य च।**
**वायोः संचरणार्थाय चतुर्थमुपकल्पयेत्॥114॥**

अर्थात् भोजनकाले उदरे रिक्तस्थानं भागचतुष्टये परिकल्प्य तत्र प्रथमे अन्नं द्वितीये व्यंजनम् तृतीये आपः चतुर्थे च वायोः संचरणाय रिक्तता स्यात् । अनेन शरीरेन्द्रियाणि सम्यक्तया कार्यं कुर्वन्ति।

3. **नित्यहोमाचरणम् :** विवाहित-पुरुषेण नित्यहोमकर्त्तव्यम्। प्रत्यहम् अग्निपरिचर्या आवश्यकी। यथाहि उक्तम् पारस्करगृह्यसूत्रे **उपयमनप्रभृत्यौपासनस्य परिचरणम्**[5] । अनेन सायंप्रातः होमात्मककर्मसम्पादनेन तस्य प्रत्यहं दिनचर्या सुष्ठुरीत्या प्रचलित येन आयुष्यलाभः, यशलाभः इत्थं सर्वविधलाभः जायते।

अधुना केचन विषयाः ये चिकित्सापद्धतिं बोधयन्ति ते अपि ज्ञातव्याः यत् कीदृश व्यवस्था पुरा प्रयोगे आसीत्।

1. **शीर्षरोगभेषजम् :** पारस्करगृह्यसूत्रे शिरसः पीडानाशाय उक्तं - पाणी प्रक्षाल्य भुवौ परिमार्ष्टि - चक्षुर्भ्यां श्रोत्राभ्यां गोदानाच्छुबुकादधि यक्ष्मं शीर्षण्यं रराटद्विवृहामीममिति ॥ अथ च

**अर्द्धं चेदवभेदकविरूपाक्ष श्वेतपक्ष महायशः।**
**अथो चित्रपक्ष शिरो मास्याभिताप्सीदिति ॥3.6.3॥**

अन्ते उक्तं—

**क्षेम्यो ह्येव भवति ॥3.6.4॥**

अर्थात् अनेन प्रकारेण शिरोरोगराहित्यं भविष्यति । इत्थं अर्थर्ववेदीयकौशिक-गृह्यसूत्रस्य चतुर्थे अध्याये अपि एषः विषयः प्रतिपादितः तत्र घृतस्य प्रयोग जरायुज इति मन्त्रमाध्यमेन ज्ञापितः, तेनापि पीडा नश्यति।

2. **उतूलपरिमेह :** पारस्करगृह्यसूत्रस्य तृतीयकाण्डस्य सप्तम्यां कण्डिकायां दुर्विनीतदास्य उपचारविधिरपि ज्ञापिता। कथं दासस्य वशीकरणं क्रियते ? यथा – **स्वपतो जीवविषाणे स्वं मूत्रमासिच्यपसवि त्रिः परिषिंचन्परीयात् – परि त्वा गिरेरहं परिमातुः परिस्वसुः परिपित्रोश्च भात्रोश्च सख्येभ्यो विसृज्यामहम् । उतूह परिमीढोऽसि परिमीढः क्व गमिष्यसि ॥** एवं ज्ञापयन् अन्ते लिख्यते क्षेम्यो ह्येव भवति। अर्थात् दासः वशे/नियन्त्रणे वा आयाति।

पारस्करगृह्यसूत्रे एतदतिरिच्य भोजनविधिः, शौचाचारविधिः अपि ज्ञापिता यस्य आधुनिके समये महत्ता वर्तते। भोजने शुचिताराहित्यात् बहवः रोगाः जायन्ते। एवमेव शौचस्य अभावे यथा – सम्यवक्तया हस्तपादप्रक्षालनाभावे मुखप्रक्षालनाभावे च कथं सूक्ष्मजीवाः वायुमण्डले प्रसरन्ति तथा च तस्य परिणामः महामारी भवति सर्वे साम्प्रतिके कोरोनाकाले अवगच्छन्ति जानान्ति च।

आहत्य सर्वं वयमवगन्तुं शक्नुमः यत् वैदिकं जीवनं सर्वश्रेष्ठम् । यथा अस्माभिः जीवनचर्या परिवर्तिता अत्र परमावश्यकतत्त्वानां समावेशः त्यक्तः, अनेनैव नैकविधाः

समस्याः जायन्ते । दीर्घायुष्यार्थं वैदिककालीनजीवनचर्यायाः चिकित्सापद्धतेश्च प्रयोगः अस्माकं कल्याणााय एव। इति शम्।

**सन्दर्भाः**


1. आवसथ्याधानं दारकाले। 1.2.1 पारस्करगृह्यसूत्रम्
2. भार्यादिरिग्नर्दायादिर्वा। 1.5.6 गौतमधर्मसूत्रम्
3. मासि मासि वोशनम्। 1.1 श्रौतसूत्रम्
4. अधः शाय्यक्षारालवणाशी स्यात्। 2.5.10 पारस्करगृह्यसूत्रम् ,
   मधुमांसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत्। 2.2.12 पारस्करगृह्यसूत्रम्
5. 1.9.1 पारस्करगृह्यसूत्रम्

UGC - CARE Listed

**पाणिनीया**
Vol. XXX, Year IX

# उपसर्गार्थचन्द्रिकानुसारं सम्पूर्वकस्य ईक्ष दर्शने इति धातोः अर्थविमर्शः

**नित्यानन्दमाना***

**1. उपोद्घातः**

सुप्रसिद्धवैयाकरणैः श्रीचारुदेवशास्त्रिभिः प्रणीता कश्चन अभूतपूर्वः शोधमूलकग्रन्थः उपसर्गार्थचन्द्रिका इति । अस्मिन् ग्रन्थे उपसर्गयोगेन एकस्यैव धातोः एकेनैवोपसर्गयोगेन बहवः अर्थाः सम्भवन्ति इत्यत्र समग्रसंस्कृतवामङ्मयतः प्रयोगाः उदर्शिताः। तेषामर्थाश्च निरूपिताः। उपसर्गयोगेन धातोः अर्थभेदे जाते तस्य धातोः कस्मिन् अर्थगणे पाठः स्यात् इति विषये अयं शोधः । एतेन तेषां सोपसर्गाणां धातूनां कारकाङ्क्षाया निर्णये अपि सौकर्यं स्याद् इति वयं मन्यामहे। तस्मादेव विषयेऽस्मिन् शोधकार्यं चिकीर्षते।

**2. सम्पूर्वकस्य ईक्ष दर्शने इति धातोः अर्थविमर्शः**

ग्रन्थकारैः सम्पूर्वकस्य ईक्ष दर्शने इति धातोः ये प्रयोगाः दर्शिताः, उपसृष्टधातूनाम् अर्थगणनिर्णयपूर्वकं ते क्रमशः आलोच्यन्ते।

**2.1. अन्वेषणार्थकः**

ग्रन्थकारैः सम्पूर्वकस्य ईक्ष दर्शने इति धातोः उदाहरणम् प्रदत्तम् - समीक्षध्वं महारण्ये देशम्...यत्रेमाः शरदः सुखं प्रतिवसेमहि (भा.) इति । **तैः अर्थः लिखितः**- समीक्षध्वम् अन्विष्यत, मृगयध्वम् । इति । **तस्मादत्र उपसृष्टधात्वर्थः** अन्वेषणम् अथवा मृगयनम् **अर्थगणश्च** अन्वेषणार्थकः **इति वक्तुं शक्यते**।

**2.2. ईक्षाणार्थकः**

सम्पूर्वकस्य ईक्ष दर्शने इति धातोः ग्रन्थकारैः उदाहणम् प्रदत्तम् - मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे (वा.सं. 36.18) । इति । **तैः अर्थः लिखितः** - इह सम्शब्दोऽर्थे विशेषं न करोति। **तस्मादत्र उपसृष्टधात्वर्थः** दर्शनम् **अर्थगणश्च** ईक्षणार्थकः

* शोधच्छात्रः, रामकृष्ण-मिशन् - विवेकानन्द-शैक्षणिक-शोधसंस्थानम्, बैलूरमठ, हावड़ा (प.ब.)

**इति वक्तुं शक्यते**।

ग्रन्थकारैः सम्पूर्वकस्य ईक्ष दर्शने इति धातोः उदाहणम् प्रदत्तम् - तव सुहृत्..तव मार्गं समीक्षमाणस्तिष्ठति (पञ्चत.) । इति । **तैः अर्थः लिखितः**- प्रतीक्षमाण इत्याह । **तस्मादत्र उपसृष्टधात्वर्थः** प्रतीक्षा **अर्थगणश्च** ईक्षणार्थकः **इति वक्तुं शक्यते**।

सम्पूर्वकस्य ईक्ष दर्शने इति धातोः ग्रन्थकारैः उदाहणम् प्रदत्तम् - स हि राजगुणैर्युक्तो युवराजः समीक्षितः। (रा. 2.45.9)। इति। **तैः अर्थः लिखितः**- समीक्षितः निश्चितः। **तस्मादत्र उपसृष्टधात्वर्थः** निश्चयः **अर्थगणश्च** ईक्षणार्थकः **इति वक्तुं शक्यते**।

ग्रन्थकारैः सम्पूर्वकस्य ईक्ष दर्शने इति धातोः उदाहणम् प्रदत्तम् - यदि त्वरेत गुरोः समीक्षायां स्वाध्यायमधीत्य कामं गच्छेत् (आप.ध. 2.5.3)। इति। **तैः अर्थः लिखितः**- समीक्षायां सन्दर्शने। गुरुचक्षुर्विषयमनतिक्रम्य स्थितः सन्नित्याह। **तस्मादत्र उपसृष्टधात्वर्थः** सन्दर्शनम् **अर्थगणश्च** ईक्षणार्थकः **इति वक्तुं शक्यते**।

सम्पूर्वकस्य ईक्ष दर्शने इति धातोः ग्रन्थकारैः उदाहणम् प्रदत्तम् - तत्नावतांसाः कुलटाः सीक्ष्य किमार्यनार्यः कुलटा भवन्ति (सुभाषितम्)। इति । **तैः अर्थः लिखितः**- समीक्ष्य दृष्ट्वा । **तस्मादत्र उपसृष्टधात्वर्थः** दर्शनम् **अर्थगणश्च** ईक्षणार्थकः **इति वक्तुं शक्यते**।

ग्रन्थकारैः सम्पूर्वकस्य ईक्ष दर्शने इति धातोः उदाहणम् प्रदत्तम् - एवमार्य समीक्ष्य त्वं प्रीतो भवितुमर्हसि (रा. 5.73.61)। इति। **तैः अर्थः लिखितः**- समीक्ष्य परीक्ष्य विमृश्य। **तस्मादत्र उपसृष्टधात्वर्थः** परीक्षणम् अथवा विमर्शनम् **अर्थगणश्च** ईक्षणार्थकः **इति वक्तुं शक्यते**।

सम्पूर्वकस्य ईक्ष दर्शने इति धातोः ग्रन्थकारैः उदाहणम् प्रदत्तम् - उचितमेवैतन्ममासमीक्ष्यकारिणः (हित.)। इति । **तैः अर्थः लिखितः**- असमीक्ष्यकारी अविमृश्यकारी। कर्याकार्ये इष्टानिष्टे अगणयित्वा यः प्रवर्तते स एवमुच्यते। समीक्ष्यं सांख्यं भवति तथा च माघे प्रयोगः- फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि (5.59)। **तस्मादत्र उपसृष्टधात्वर्थः** विमर्शनम् **अर्थगणश्च** ईक्षणार्थकः **इति वक्तुं शक्यते**।

**2.3 ज्ञानार्थकः**

ग्रन्थकारैः सम्पूर्वकस्य ईक्ष दर्शने इति धातोः उदाहणम् प्रदत्तम् - समीक्षा यादृशी ह्यस्य पाण्डवान्प्रति भारत (भा.वन. 8.8)। इति। **तैः अर्थः लिखितः**- समीक्षा विचारपूर्विका बुदिः । **तस्मादत्र उपसृष्टधात्वर्थः** विचारपूर्विका बुद्धिः **अर्थगणश्च** ज्ञानार्थकः **इति वक्तुं शक्यते**।

सम्पूर्वकस्य ईक्ष दर्शने इति धातोः ग्रन्थकारैः उदाहणम् प्रदत्तम् - तत्रापराणि दारूणि संसृज्यन्ते परस्परम्। तृणकाष्ठकरीषाणि कदाचिन्न समीक्षया (भा.शा. 261.23)। इति । **तैः अर्थः लिखितः**- उक्तोऽर्थः । **तस्मादत्र उपसृष्टधात्वर्थः**

विचारपूर्विका बुद्धिः **अर्थगणश्च** ज्ञानार्थकः **इति वक्तुं शक्यते**।

ग्रन्थकारैः सम्पूर्वकस्य ईक्ष दर्शने इति धातोः उदाहणम् प्रदत्तम् - समीक्ष्य कामात् सुग्रीवं मन्दं धर्मार्थसङ्ग्रहे (रा. 4.28.1)। इति। **तैः अर्थः लिखितः**- समीक्ष्य उपलभ्य विज्ञाया। **तस्मादत्र उपसृष्टधात्वर्थः** विचारपूर्विका बुद्धिः **अर्थगणश्च** ज्ञानार्थकः **इति वक्तुं शक्यते**।

**2.4 विचारार्थकः**

सम्पूर्वकस्य ईक्ष दर्शने इति धातोः ग्रन्थकारैः उदाहणम् प्रदत्तम् - भोजयन्ति किल श्राद्धे केचित्स्वानेव बान्धवान् । ततः पश्चात् समीक्षन्ते कृतकार्यान् द्विजर्षभान् (रा. 2.61.12) । इति । **तैः अर्थः लिखितः**- समीक्षन्ते विचारयन्ति भोजयितुम् । **तस्मादत्र उपसृष्टधात्वर्थः** विचारः **अर्थगणश्च** विचारार्थकः **इति वक्तुं शक्यते**।

**2.5 सङ्ख्यानार्थकः**

ग्रन्थकारैः सम्पूर्वकस्य ईक्ष दर्शने इति धातोः उदाहणम् प्रदत्तम् - न त्वां समीक्षते पार्थो नापि राजा युधिष्ठिरः (भा.उ. 162.63)। इति। **तैः अर्थः लिखितः**- समीक्षते गणयति। **तस्मादत्र उपसृष्टधात्वर्थः** गणनम् **अर्थगणश्च** सङ्ख्यानार्थकः **इति वक्तुं शक्यते**।

**2.6 स्मरणार्थकः**

सम्पूर्वकस्य ईक्ष दर्शने इति धातोः ग्रन्थकारैः उदाहणम् प्रदत्तम् - अभिषेकं न जानामि योऽभूद्राज्ञः समीक्षितः (रा. 2.75.3)। इति। **तैः अर्थः लिखितः**- समीक्षितः चिन्तितः **तस्मादत्र उपसृष्टधात्वर्थः** चिन्तनम् **अर्थगणश्च** विचारार्थकः **इति वक्तुं शक्यते**।

**3. उपसंहारः**

ग्रन्थकारैः सम्पूर्वकस्य ईक्ष दर्शने इति धातोः ये अर्थाः उक्ताः ते तावत् - अन्वेषणम् अथवा मृगयनम् , दर्शनम् , प्रतीक्षा, निश्चयः, सन्दर्शनम् , परीक्षणम् , विमर्शनम् , विचारपूर्विका बुद्धिः, विज्ञानम् , विचारः, गणनम् , चिन्तनम् चेति। उपसर्गार्थचन्द्रिका इत्येनं ग्रन्थमाश्रित्य शोधकार्यं कर्तुं महत्सौभाग्यमवाप्तम् । अभूतपूर्वः उत्तमशोधपूर्णोऽयं ग्रन्थः । प्रकृतशोधकार्यस्य महान् अवसरः प्राप्तः। कार्यकरणेन स्वयं समृद्धः सञ्जातः। इति शिवम्।

**सङ्केताक्षरसूची**

1. आप. ध. - आपस्तम्बधर्मसूत्रम् , पञ्चत. - पञ्चतन्त्रम् , भा.उ.- महाभारतम् (उद्योगपर्व) भा.वन.- महाभारतम् (वनपर्व), भा.शा. -महाभारतम् (शान्तिपर्व), रा.- रामयणम् , वा.सं. - वाजसनरेयी संहिता, हित.- हितोपदेशः।

**परिशलित-ग्रन्थसूची**


1. अमरसिंहः 2013 अमरकोषः (सुधाव्याख्यासमेतः) पणशीकरः, वासुदेवलक्ष्मणशास्त्री (सम्पा.) दिल्ली, चौखम्बा-संस्कृत-प्रतिष्ठान
2. पाणिनिः 2016 अष्टाध्यायी पाण्डेयः, गोपालदत्तः (सम्पा.) वाराणसीः चौखाम्बा सुरभारती प्रकाशन
3. भट्टः, कौण्डः 2013 वैयाकरणभूषणसारः, द्विवेदी, चन्द्रिकाप्रसादः (सम्पा.) दिल्ली, चौखम्बा संस्कृत प्रतिष्ठान
4. भट्टः, नागेशः, 2013 परमलघुमञ्जुषा, दाहाललोकमणि (सम्पा.) वाराणसीः चौखाम्बा सुरभारती प्रकाशन
5. भट्टः, नागेशः, 2013 लघुशब्देन्दुशेखर (प्रथमभागः) बालशास्त्री (सम्पा.) वाराणसीः चौखाम्बा सुरभारती प्रकाशन
6. शास्त्री, चारुदेवः 1997 उपसर्गार्थचन्द्रिकावाराणसीः भारतीय-विद्या-प्रकाशनम्

# 'असिद्धवदत्राभात्' इति सूत्रे बालमनोरमा-सिद्धान्तरत्नाकरकारयोः दृष्टिः

**श्रीनिवास स्वाई***

सर्वं वाक्यं क्रियया परिसमाप्यते इति वचनेन सर्वप्रथमं क्रियया ज्ञानं परमावश्यकं भवति । क्रिया च धात्वधीना भवति धातुश्च पाणिनीयसंकेतसम्बन्धेन क्रियावाचकानां भ्वादिगणपठितत्वेन ज्ञेयः । अथ च सर्वं वाक्यं धातुजमाह इति रीत्या सर्वेषामपि वाक्यानां गूढतत्वज्ञानाय प्रकृतिज्ञानं तदुद्देश्यकप्रत्ययज्ञानञ्च परमावश्यकं भवति । तज्ज्ञानाय एव पाणिनिना धातुपाठस्य पृथक्त्या विवेचनं कृतम् यथोत्तरमुनीनां प्रामाण्यम् इति वचनेन च तदुत्तरवर्तिनः आचार्याः दीक्षितप्रभृतयः वैयाकरणसिद्धान्तकौमुदीप्रभृतिग्रन्थान् रचयामास। तत्रापि सुबन्तपदानां विवेचनपूर्वकं सुतिङन्तंपदम् इत्यादि सूत्रबलेन तस्य न केवला प्रकृतिप्रयोक्तव्या नापि प्रत्ययः इति भाष्यवचनञ्च मनसि निधाय तिङन्तानां पदत्वसिद्धये अथ च तिङन्तज्ञानाय भ्वादिप्रभृतीनां दशगणानां पृथक्तया विवेचनं कृतवान् दीक्षितः । एवमेव तमेवग्रन्थं उररीकृत्य पण्डितरामकृष्णभट्टः सिद्धान्तरत्नाकराख्यां काचित् विशिष्टां टीकां टीकितवान् । तथैव वासुदेवदीक्षितः बालमनोरमां कृतवान् । तत्रापि उभयोः मतवैमत्यं विशेषेण मया दृष्टम् अतः एतस्मिन् कश्चिद्विलक्षणं सूत्रमादाय शोधनिबन्धः आवश्यकः इति मन्मनसि आगतः। वस्तुतः व्याकरणप्रक्रियासिद्धये सूत्रस्य षड्विधत्वं प्रतिपादितम् यथा–

**संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते।।**

अतः मया उभयविध्यात्मकम् अतिदेशाधिकारात्मकं सूत्रं चितम् । अस्य च अतिदेशत्वमधिकारत्वं वा इत्यत्र आह भट्टोजिदीक्षितः वैयाकरणसिद्धान्तकौमुद्याम् असिद्धवदत्राभात्।

त्रिपदात्मकमधिकारोऽतिदेशश्च सूत्रमिदम् । असिद्धेन तुल्यमसिद्धवत् ।

*अतिथि-प्राध्यापकः, संस्कृतविभागः, ओडिशा-केन्द्रीय-विश्वविद्यालयः, कोरापुटम्

असिद्धवदिति अव्ययपदम्, अत्र आ इत्युभेऽव्यये । भाच्च पञ्चम्यन्तं पदम्, इत ऊर्ध्वमापादपरिसमाप्तेराभीयम् । अर्थात् सूत्रमिदमष्टाध्यायीस्थषष्ठाध्यायस्य चतुर्थपादस्य द्वाविंशतिकम् सूत्रम्, भम् अभिव्याप्य आभम्, तस्मात्तत्र भवमाभीयम् । अत्र पदं समानाश्रयप्रतिपत्त्यर्थम् , आभाद्ग्रहणञ्च विषयनिर्देशार्थम् । सूत्रेऽस्मिन् अभिविध्यर्थे आङ् इति। वत्यर्थघटितत्वमतिदेशत्वम् इतिनियमेनातिदेशसूत्रम्। एवञ्च अपादपरिसमाप्तेरधिकारः गच्छति इत्यनेन चास्य अधिकारसूत्रत्वमपि। आभाच्छात्रे समाननिमित्तके कार्ये कर्तव्ये तादृशं जातमाभीयशास्त्रमसिद्धं स्यादित्यर्थः।

**बालमनोरमाकारः**

सूत्रविचारप्रसङ्गे बालमनोरमाकारः गदति - अष्टाध्यायीस्थषष्ठाध्यायस्य चतुर्थपादस्य **'श्नान्नलोपः'**[1] इति सूत्रात् पूर्वं पठितं सूत्रमिदम्। आभादित्यत्र आङ्पदम् अभिविध्यर्थे विद्यते। भाधिकारश्च आपादपरिसमाप्तेरिति। श्लान्नलोपः सूत्रमबधिनिर्णीतं तर्हि कथमारभ्यते सूत्रमिदम् ? इत्याकांक्षायामुपस्थापित्वादस्मादेव सूत्रादूर्ध्वमापादपरिसमाप्तेराभीयं स्यादित्यर्थः । अर्थात् 'श्नान्नलोपः' इत्यारभ्यापादसमाप्ते विहितं यदाभीयं कार्यं तदसिद्धवद्भवति । प्रवृत्तमप्यप्रवृत्तवद्भवतीत्यर्थः । **अत्रेत्यनेन निमित्तसप्तम्यन्तेन त्वसिद्धी भवतः कार्यस्य यन्निमितं तन्निमित्तिके कार्ये कर्तव्ये सतीत्यर्थलाभात् 'समानाश्रये कार्ये कर्तव्ये असिद्धवत्'**[2] इति लभ्यते।

आभीयकार्यकर्तव्येऽसिद्धवद्भवतीति उदाहरणमस्य 'जङ्घही' । हन् धातोः 'धातोरेकाचो हलादेः क्रियायसमभिव्याहारे यङ्' सूत्रेण यङ्प्रत्यये 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां 'यङोऽचि च' सूत्रेण यङ्लुकि 'सन्यङोः' इति सूत्रेण द्वित्वे कृते च लोट्लकारे मध्यमपुरुषस्यैकवचने सिप्प्रत्यये 'ह हन् +सिप्' इति, कुहोश्चु सूत्रेण अभासस्य चुत्वे जश्त्वे च 'अभ्यासाच्च' इत्यनेन अभ्यासात् परस्य हन्तेर्हकारस्य कुत्वे (वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणः) **'नुगतोऽनुनासिकान्तस्य'**[3] सूत्रेण नुगागमे नुगनुस्वारे, अनुस्वारस्य परसवर्णे च जङ्+घन्+सिप् इति । सेर्हि आदेशे, 'अनुदात्तो...' इति सूत्रेण अनुनासिकनकारस्य लोपे 'जङ्घहि' इति प्रयोगः सिद्ध्यति। अत्र 'अतो हेः' सूत्रेणादन्तत्वात् लुक् प्रान्प्रोति, आभीये कर्तव्ये प्राप्ताभीयशास्त्रस्य अनुनासिकलोपस्य असिद्धत्वात् तत्र नकारः परिदृश्यते तस्मात् **अतो हेः** शास्त्रस्य नैव प्रवृत्तिः।

**सिद्धान्तरत्नाकरदिशा**

सूत्रेऽस्मिन् यत् असिद्धवचनपठितं तत्परिष्क्रियते टीकाकारैः **'असिद्धवचनामादेशकलक्षणशास्त्रस्य प्रतिषेधार्थम् उत्सर्गलक्षणं भावार्थञ्च'**[4]। यतो हि नियमोऽस्ति व्यापकीभूतशास्त्रम् उत्सर्गशास्त्रम् , एकदेशव्याप्यभूतशास्त्रम् अपवादशास्त्रम्। **'आगाहि' 'जहि'** इत्यादयः प्रयोगसाधुत्वप्रतिपादनाय आदेशशास्त्रस्य प्रतिषेधो भवतीति । 'जहि' इत्यत्र हन्धातोः मध्यपुरुषे लोट्लकारे सिप्प्रत्ययः हन् + सिप् पकारस्य 'हलन्त्यम्' सूत्रेण

इत्सञ्ज्ञा, अदादित्वात् शपोर्लुक् हन् + सि इति जाते **'सेर्ह्यपिच्च'**[5] सूत्रेण सेर्हिः स्यात् तथा च **'हन्तेर्जः'** सूत्रेण जादेशे सति 'जहि' प्रयोगः साधुत्वं याति। ज + हि अत्र **'अतो हेः'** सूत्रेण अदन्तात् हेर्लुक् प्राप्नोति समानाश्रयत्वात्, आभीये कार्ये कर्तव्ये जाताभीशास्त्रम् आदेशशास्त्रं हन्तेर्जः इत्यस्यासिद्धत्वात् जहि इत्यत्र जकारेऽदन्तत्वं न मिलति, अतः 'अतो हेः' सूत्रेण लुक् न भवति।

उत्सर्गशब्देन स्थान्यत्रोपदिश्यते आदेशेन तन्निवर्त्तते इति। उत्सर्गलक्षणभावार्थम् अस्योदाहरणम् 'एधि' 'शाधि' इति। **'एधि' इत्यत्र** अस्धातोः कर्तरि शप् , लोट्लकारे मध्यमपुरुषैकत्वविवक्षायां सिप्प्रत्यये च अदादिभ्यो शलोर्लुकि अस् + सि इति जाते सेर्ह्यपिच्च सूत्रेण सेर्हिः स्यात्, **'श्नसोरल्लोपः'** सूत्रेण अकारस्येत्संज्ञायां **'घ्वसोरेद्धावभ्यासलोपश्च'**[6] सूत्रेण एत्वे ए + हि इति जातः। **'हुझल्भ्यो हेर्धि'**[7] सूत्रेण झलन्तलक्षणत्वाभावात् धित्वं न प्राप्नोति। समानाश्रयेऽऽभीये कार्ये घ्वसोरेद्धाव इति जाताभीयशास्त्रमसिद्धं भवति तथा झलन्तत्वात् 'हुझल्भ्योहर्धिः' सूत्रेण धिभवति, तस्माद् 'एधि' इति प्रयोगः साधुत्वं याति।

अयं न स्वतन्त्रो विधिः। यदि विधिसूत्रं मन्यते चेत् **'अभाजि' 'रागः'** इत्यत्रानाभीयवृद्धौ कर्तव्यतायां नलोप आभीयशास्त्रमसिद्धं स्यात्। अभाजि इत्यत्र **भञ्जो आमर्दने** धातोरात्मनेपदे कर्मणि लुङ्लकारे तप्रत्यये सति **चिणभावकर्मणोः** सूत्रेण चिणि 'भञ्ज+इ+त' इति चिणो लुक् सूत्रेण तकारस्येत्सञ्ज्ञा भञ्जेश्च चिणि इत्यनेन भञ्जेरुपधायाः ञकारस्य लोपे अडागमे च 'अभज्+इ' जाते अत उपधायाः सूत्रेण उपधाकारस्य वृद्धिः अभाजीति प्रयोगः साधुः। विधिसूत्रं स्वीक्रियते अत उपधाया इति अनाभीये कार्ये भञ्जेश्च चिणीति आभीयकार्यमसिद्धिं स्यात्। तथैव – 'रागः' **'रञ्ज्यतेऽनति रागः'** रागार्थकात् रञ्ज्धातोः घञ्प्रत्यये **'घञि च भावकरणयो'**[8] सूत्रेण रञ्ज्धातोरुपधानेकारस्य लोपः स्यात्। **'अत उपधायाः'**[9] सूत्रेण वृद्धौ सति **'चोः कु'** शास्त्रेण कुत्वे च रागः प्रयोगः सिद्ध्यति। अत्र समानाश्रयत्वात् अत उपधाया इत्यनाभीयशास्त्रस्य प्रवृत्तौ च नलोपाभीयशास्त्रमसिद्धवद् भविष्यति। विधिसूत्रस्वीकारे बहुदोषाः पोढव्याः। अतोऽधिकारसूत्रमिदम् इत्याशयोनोच्यते इत **ऊर्ध्वमिति - 'नन्वेवमुतरत्र यत्र सूत्रेऽस्योपस्थापनं तद् एवारभ्य यदाभीयं तस्मिनेव कर्तव्येऽसिद्धत्वं स्यात् , न तु पूर्वस्मिन्नपि। पूर्वस्मिन् स्वीकारे नास्ति चेष्टापत्तिः ? इति न वक्तव्यः भेददयं दोषः 'एधि' इत्यत्र घ्वसोरेद्धाव इति सूत्रेण एत्वञ्च पूर्वस्मिन् धित्वे कर्तव्येऽसिद्धत्वानापत्तेरिति चेन्न, अर्थाधिकाराश्रयणात्'।**[10] श्नान्नालोप इतिसूत्रमवधिनिर्णीतम्। तादृगवधिविशिष्टमेव सूत्रं प्रतियोगमापादसमाप्त्युपतिष्ठत इति। अर्थात् असिद्धवदत्राभात् सूत्रात् यावदुत्तरोत्तरमाभीयकार्ये कर्तव्येऽसिद्धत्वं स्यादेव। यतोहि नियमोऽस्ति - 'स्वदेशे वाक्यार्थबोधशून्यत्वे सति उत्तरसूत्रेण सह सफलवाक्यार्थबोधजनकत्वमधिकारत्वम्'। **'वस्तुतस्तु प्राचां काशिकाकारादीनां मते**

**प्रतिसूत्रमसिद्धवतीति उपस्थितावतिगौरवाप्तेः तस्मात् स्वतन्त्रं स्वीकृतम् । 'अभाजि' 'रागः' इत्यत्र नास्ति कोऽपि दोषः । यतो भगवता पाणिनिना प्रोक्तं 'तेन रक्तं रागामिति' सूत्रम्'।**[11] अत्र रागात्पञ्चम्यन्तपदेन लिङ्गेन च अनाभीये कर्तव्येऽसिद्धत्वाभावज्ञापकोऽस्ति । मुनिवचनप्रामाण्यात् रागः इत्यत्र नास्ति दोषः किन्तु अभाजीत्यत्र अनिष्टापत्तिः तस्मादधिकारसूत्रमिति।

इह मर्यादाभिविध्योराङ् दृष्टः । द्वयोः को भेदः ? विना तेनेति मर्यादा, सह तेनेत्यभिविधिरिति तयोर्भेदः । पुनरत्र टीकाकारेण सन्देहः क्रियते – किं भात्प्रागसिद्धं ? तेन सहेति वा ? अस्य निवारणाय **महाभाष्यपक्षमङ्गीकरोति** । यथा – 'आङयं निर्देशः क्रियते, आङ् च पुनः सन्देहं जनयति । तद्यथा – आपाटलिपुत्रात्दृष्टो देव इति । अत्र सन्देहः किं प्राक्पाटलिपुत्रात् ? पाटलिपुत्रेण सह इति ? कश्चात्र विशेषः ? प्राग्भादिति चेच्छुनामघोना भूगुणेषूपसंख्यानं कर्तव्यम् । शुना इत्यत्र श्वन्शब्दात् सम्प्रसारणे कृतेऽल्लोपोऽन इति लोप प्राप्नोति । यस्य पुनः तेनाऽसिद्धत्वम् असिद्धत्वातत्तस्य न संयोगाद्वमन्तादिति सूत्रेण प्रतिषेधो भविष्यति । तस्यापि प्राग्भादसिद्धत्वं तस्याप्येष न दोषः । नास्त्यत्र विशेषोऽल्लोपेन वा निवृत्तौ सत्यां, पूर्वत्वेन वा । अयं विशेषः – अल्लोपेन निवृत्तौ सत्यामुदात्तनिवृत्तिस्वरः प्रसज्यते । नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति । किं कारणम् ? न गोश्वन्सावर्णेति प्रतिषेधात् । तथैव मघोना इत्यत्रैव 'मघवन्शब्दात् **'श्वयुवमघोना'** इति सूत्रेण सम्प्रसारणे कृते यस्येति लोपः प्राप्नोति। यस्य पुनः सह तेनाऽसिद्धत्वमसिद्धत्वात्तस्य न भविष्यति । यस्यापि हि प्राग्भादसिद्धत्वं तस्याप्येष न दोषः । कथम् ? वक्ष्यत्येतन्मघवन्शब्दोऽयुत्पन्नं प्रातिपदिकमिति'।[12]

सूत्रे 'अत्र' पदं समानाश्रयप्रतिपत्यर्थं यद्यत्रपदं न दीयते चेत् सूत्रार्थो भवति निमित्तभिन्ने आभीयकार्ये कर्तव्ये जाताभीयशास्त्रमसिद्धम् । तर्हि व्याश्रयत्वात् 'पपुषः' एवं 'चिच्युषः' इत्यादौ असिद्धवद्भविष्यति । यथा – **'पपुषः'** 'पाधातोः' लिः कानच् वा पातेश्चिनोतेर्लुनातेश्च क्वसुः **'क्वसुश्च'**[13] इति सूत्रेण लिकारस्थाने क्वसुप्रत्ययऽ, मकारोकारयोः इत्यसंज्ञा, 'लिटि धातोरनभ्यास्य' शास्त्रेण द्वित्वे 'पूर्वोऽभ्यासः' इति अभ्याससञ्ज्ञायां अनभ्यासस्याचो ह्स्वे सति 'प पा+वस्' इति जातः । कृदन्तत्वात् प्रातिपदिकसंज्ञा द्वितीयाबहुवचने शस्प्रत्ययः । शकारस्येत् संज्ञा एवं **'यचि भम्'** सूत्रेण भसञ्ज्ञा स्यात् । **'वसोः सम्प्रसारणम्'**[14] इति शास्त्रेण वस्वन्तस्य भस्य 'उ' सम्प्रसारणम् । 'सम्प्रसारणाच्च' सूत्रेण पररुपे 'प पा+उस् +अस्' इति निष्पन्नः । **'आतो लो इटि च'**[15] इति सूत्रेण अभ्यासपरतः पाधातोऽऽकारस्येत् संज्ञा च 'पपुषः' इति सिद्धम् । अत्र भिन्न-भिन्ननिमित्तकेन आल्लोपे कार्ये कर्तव्ये सम्प्रसारणं नासिद्धम् । तथैव चिच्युष इत्यत्रापि- 'चि' धातोः लिटि क्वसुप्रत्यये द्वित्वे कार्ये च कृदन्तत्वात् प्रातिपदिकसंज्ञा द्वितीयाबहुत्वविवक्षायां शस् प्रत्यये शकारस्येत् संज्ञा 'चि चि+वस् +अस्' इति जातः । यचि भम् इति भसंज्ञा, वसोः 'उत्व' सम्प्रसारणम् । 'एरनेकाचोऽसंयोगापूर्वस्य' इति शास्त्रेण 'इयङ्' बाधित्वा परत्वात्

यणादेशः 'चि च+उस्+अस्' इति, आदेशप्रत्यययोः सूत्रेण षकारादेशे रुत्वविसर्गे च 'चिच्युषः' इति प्रयोगः साधुत्वं याति। अत्र यणि कर्तव्ये जाताभीयशास्त्रम् उत्वशास्त्रं नासिद्धं व्याश्रयत्वात् । एतस्मात् कारणात् सूत्रवृत्तौ समानाश्रये तस्मिन्कर्तव्ये इति पदं दत्तं भट्टोजिदीक्षितेन।

तस्मिन्कर्तव्ये इति 'पदव्याख्यानं कुर्वता टीकाकारेण लिख्यते यद् आभाच्छास्त्रे समाननिमित्तके कर्तव्ये तादृशाभाच्छ स्त्रमसिद्धमित्यर्थः । वतिस्तु न वक्तव्यः, यतोहि वत्सर्थघटितत्वम् अतिदेशत्वम्। वतिं विना तदर्थलाभो भवति। **'अत्रापि भाष्यादावा-भाच्छास्त्रम् इत्यनेन शास्त्रसिद्धत्वमाश्रितम् । आभाच्छास्त्रेण एधि शाधि इत्यत्र स्थानिनो झलन्तबुद्धेरनिवर्तित्वात् तन्निबन्धनं धित्वं सिद्ध्यति । प्राचां तु कार्यसिद्धत्वमुक्तम्, तत् प्रामादिकमिति'**[16] मनोरमाव्याख्यायां भट्टोजिदीक्षितेन अलिख्यत। अर्थात् प्राचीनाचार्याः कार्यसिद्धत्वपक्षमुपस्थापयन्ति नव्याः तत् प्रामादिकमिति कथयन्ति । वस्तुतः प्राचीनाः पूर्वत्रासिद्धमित्यत्रैव सूत्रे कार्यसिद्धत्वपक्षमुपपादयन्ति न तु अस्मिन् सूत्रे। एवञ्च ईदूदेत्सूत्रस्थकौस्तुभेन सह इहत्यो ग्रन्थो विरुध्यते। यथा – 'यद्यपि द्विमात्रत्रिमात्रेणापहतस्तथापि पूर्वत्रासिद्धमिति शास्त्रासिद्धत्वबोधशासनात्रिमात्रेऽपि द्विमात्र एवायमिति बुद्ध्या प्रगृह्यसंज्ञा क्रियते। अत एवऽमुनेत्यत्र मुत्वे कृते तदुपजीवनेन नाभावे - च कृते सुपि चेति दीर्घो मुशब्दोपमिति बुद्धया प्राप्रोति, तत्परिहाराय तन्त्रावृत्याद्याश्रयेण नाभावे कर्तव्ये कृते च मुभावो नासिद्धिं प्राप्रोति । न त्विह द्विमात्रे कृतां संज्ञां स्थानिवद्भावेन त्रिमात्रेऽऽनयामः येनानल्विधाविति निषेधः शङ्क्यते। न हि रजतक्षमप्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयतीति युक्तम् । एतावानेन परं विशेषः रजतभ्रमोऽनाहार्य्यप्रवर्त्तकः, इह तु शास्त्रप्रमाण्यादाहार्यारोपेति तत्तच्छास्त्रप्रवृत्तावप्रवृत्तौ च नियामक इति''17 एतद्कैयटेनैव स्पर्ट कृतम् - **'शास्त्रासिद्धत्वाश्रयणाच्च प्लुतबुद्धावसत्यां प्रगृह्यत्वे विधीयमाने द्विमात्रत्वबुद्धिः प्रवर्तते'।** प्रकृते तु एधि शाधि इत्यत्र स्थानिनो झलन्तबुद्धेर+निवर्तितत्वादिति तद्विपरीतं शास्त्रासिद्धत्वमुक्तम् । आदेशे सत्येव आहार्यारोपन्यायेन झलन्तत्वविषया बुद्धिः प्रवर्तते इति वक्तुं युक्तम्। **''किञ्च दूषणमेव। अपि च शाभावः असिद्ध इत्यादि भाष्यस्थशब्देषु प्राचा मते लक्षणेति भाष्यादिपरिशीलनशालिभिर्विभावनीयम् इति टीकाकारस्याशयः''।**[18]

निष्कर्षः -

उपर्युक्तटीकयोः व्याख्यानेन प्रतीयते यत् सूत्रेऽसिद्धवचनम् आदेशलक्षणप्रतिषेधार्थम् उत्सर्गलक्षणभावार्थं च । प्रथमवाक्यस्य फलं जहि । द्वितीयवाक्यस्य उदाहरणम् एधि, शाधि, इति। अस्मिन्पक्षे बालमनोरमाकारः केवलं एधि शाधि इत्युदाहरणं दत्वा असिद्धत्वं स्पष्टयति । पुनश्च बालमनोरमाकारेण 'अत्र' पदं निमित्तसप्तम्यन्तं स्वीकृतम्। अत्रेत्यनेन निमित्तसप्तम्यन्तेन त्वसिद्धी भवतः कार्यस्य यन्निमित्तं तन्निमित्तके कार्ये कर्तव्ये सतीत्यर्थलाभात्। सूत्रेऽस्मिन् आभात् समस्तपदे उभौ टीकाकारौ

स्वमतं भिन्न-भिन्नरूपेण समुपस्थापयतः। तथा च प्रसङ्गेषु भिन्नानि उदाहरणानि प्रतिपादितानि। किन्तु रत्नाकरे प्रायः भाष्यकैयटयुक्तिं प्रदाय प्राच्यनव्ययोः मतभिन्नता व्याख्याता। तद्यथा - भाष्यादावाभाच्छास्त्रं शास्त्रसिद्धत्वपक्षं स्वीकृतम्। प्राचा तु कार्यसिद्धत्वमुक्तम्, नवीनाः तत्प्रामादिकम् इत्युक्तवा उपेक्षन्ते। पुनश्च प्राचीनाः स्वमतमुपस्थापयन्ति पूर्वत्रासिद्धमित्यत्रैव कार्यासिद्धत्वपक्षं वर्णितं न तु अस्मिन् सूत्रे। एवञ्च ईदूदेत्सूत्रस्थकौस्तुभेन सह इहत्यो ग्रन्थो विरुध्यते।

**सन्दर्भाः**

1. पा. सू. 6/4/23
2. बा.मनो.सि.कौ., पृ. 14 उत्तरभाग
3. सि.कौ. सू.सं. 2643
4. सि.रत्ना.टी.सि.कौ., पृ. 20, उत्तरभाग
5. सि.कौ. 2201
6. सि.कौ. 271
7. सि.कौ. 2425
8. सि.कौ. 3182
9. सि.कौ. 2232
10. सि. रत्ना.टी.सि.कौ., पृ. 21
11. सि. रत्ना.टी.सि.कौ., पृ. 21
12. म. भा. 6.4.22, पृ. 876-878
13. सि.कौ. 3094/5095
14. सि.कौ. 4351
15. सि.कौ. 2372
16. प्रौ. म. तिङर्थे, पृ. 322
17. म.भा. 6.4.22
18. सि. रत्ना. टी.स.कौ., पृ. 22

**सन्दर्भग्रन्थाः**

1. वैयाकरणसिद्धान्तकौमुदी, बालमनोरमा-तत्त्वबोधिनी सहित, भट्टोजिदीक्षितः, मोतिलालप्रकाशन, वाराणसी, 2011
2. वैयारणसिद्धान्तरत्नाकर, संपा. प्रो. आजाद मिश्रः, सत्यम् पब्लिशिंग नईदिल्ली, 2016
3. महाभाष्यम्, आचार्यपतञ्जली, केन्द्रीयसंस्कृतविश्वविद्यालय, 2009
4. प्रौढमोरमा, भट्टोजिदिक्षीतः, चौखम्बाप्रकाशन, वाराणसी, 2011
5. अष्टाध्यायी, महर्षिपाणिनि, चौखम्बासुरभारतीप्रकाशन, वाराणसी, 2016
6. धातुपाठः, महर्षिपाणिनि, चौखम्बासुरभारतीप्रकाशन, वाराणसी, 2016

UGC - CARE Listed

**पाणिनीया**
Vol. XXX, Year IX

# सरस्वतीकण्ठाभरणदिशा 'हयवरलण्' इति सूत्रविमर्शः

**कृष्णगोपालपात्रः***

**कूटशब्दाः** - हयवरलण् , हयवरट् , लण् , सरस्वतीकण्ठाभरणम् , हृदयहारिणी, चान्द्रव्याकरणम्।

प्रत्याहारः हि व्याकरणस्याधारभूतः । पाणिनीयव्याकरणेऽपि मूलभूतानि प्रत्याहारसूत्राण्येव । प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णाः अस्मिन् इति प्रत्याहारः । प्रत्याहारस्तु लाघवेन शास्त्रप्रवृत्त्यर्थः । प्रत्याहारसूत्राणां संख्याविषये वैमत्यं राराजयते व्याकरणनिकाये । पुनश्च तेषां प्रत्याहारसूत्राणां निर्माता कः इति विषये विपश्चिदपश्चिमा अपि विप्रतिपन्नाः । केषाञ्चन मते पाणिनिरेव स्वयं प्रत्याहारसूत्रनिर्माता, परेषां नये च भगवान् महेश्वरः तत्कर्ता इति । महेश्वर एव प्रत्याहारसूत्रनिर्माता इति वस्तुतो बहवो विचारयन्ति । तेषां मते महेश्वरस्य ढक्कायाः[1] चतुर्दशनादाः उद्भूताः आसन् । त एव नद्राः प्रत्याहारसूत्राणि माहेश्वरसूत्राणि शिवसूत्राणि इत्यादिभिः अभिधानान्तरैः सुविख्याताः । इमानि च प्रत्याहारसूत्राणि समादाय पाणिनिः स्वग्रन्थं अष्टाध्यायीं रचयामास । पाणिनिपरम्परायां चतुर्दशमाहेश्वरसूत्राणि सुप्रसिद्धानि । सरस्वतीकण्ठाभरणव्याकरणे तु त्रयोदश प्रत्याहारसूत्राणि विद्यन्ते । चान्द्रव्याकरणमनुसृत्य श्रीमता भोजराजेन त्रयोदश प्रत्याहारसूत्राणि सूत्राणि सूत्रितानि । चान्द्रव्याकरणे हयवरट् लण् इति पृथक् सूत्रद्वयं न विद्यते, अपि तु हयवरलण् इत्येकमेव । तथैवात्र सरस्वतीकण्ठाभरणव्याकरणे अपि इमां परम्परां स्मारं स्मारं हयवरलण् इत्येकमेव सूत्रमिति त्रयोदश प्रत्याहारसूत्राणि । कथं हयवरट् लण् इत्यनयोः सूत्रयोः हयवरलण् इत्येकीभाव इति तु हयवरलण् इति सूत्रस्य व्याख्यानावसरे सप्रमाणं प्रतन्यते । पाणिनीयव्याकरणे प्रत्याहारसूत्राणि तावत् - अ इ उ ण् ॥1॥ ऋ लृ क् ॥2॥ ए औ ङ् ॥3॥ ऐ औ च् ॥4॥ ह य व र ट् ॥5॥ लण् ॥6॥ ञ म ङ ण न म् ॥7॥ झ भ ञ् ॥8 ॥ घ ढ घ ष् ॥9॥ ज ब

* अतिथि प्राध्यापकः (सांख्य-योगविभागः), श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

ग ड दश्॥10॥ ख फ छ ठ थ च ट त व्॥11॥ क प य्॥12॥ श ष सर्॥13॥ हल्॥14॥

भोजव्याकरणे प्रत्याहारसूत्राणि हि–

अ इ उ ण्॥1॥ ऋ ल् क्॥2॥ ए ओ ङ्॥3॥ ऐ औ च्॥4॥ ह य व र ल ण्॥5॥ ञ म ङ ण न म्॥6॥ झ भ ञ्॥7॥ घ ढ घ ष्॥8॥ ज ब ग ड द श्॥9॥ ख फ छ ठ थ च ट त व्॥10॥ क प य्॥11॥ श ष स र्॥12॥ हल्॥13॥

पाणिनिव्याकरणे चतुर्दश प्रत्याहारसूत्राणि विद्यन्ते, तत्रैव च भोजव्याकरणे त्रयोदश। इह सम्प्रदाये हि हयवरलण् प्रत्याहारसूत्रस्वरूपम्। पाणिनीयव्याकरणे तु एतदेकस्य सूत्रस्य स्थले पृथक्तया सूत्रद्वयं सूत्रितम्। सरस्वतीकण्ठाभरते व्याकरणान्तरस्य प्रभावः प्रतिक्षणं स्फुटमवाप्यते इति पूर्ववोक्तम्। प्रत्याहारसूत्रनिर्माणावसरे चान्द्रव्याकरणमनुसृतम्। चान्द्रव्याकरणे अपि त्रयोदश एव प्रत्याहारसूत्राणि विद्यन्ते। किञ्च हयवरट् लण् इत्यनयोः सूत्रयोः स्थले एकमेव हयवरलण् इत्याकारकं सूत्रं दरीदृश्यते इति चान्द्रव्याकरणस्य प्रभावोऽपि अनुमातुं शक्यः। तथा न केवलं प्रत्याहारसूत्रस्वरूपविषये अपि तु तेषां व्याख्यानावसरेऽपि टीकाकृता दण्डनाथनारायणेन चान्द्रवृत्तेस्तथा काशिकावृत्तेः साहाय्यं स्वीकृतमिति तत्तत्सूत्रव्याख्यानावसरे सुस्पष्टम्। शोधप्रबन्धेऽस्मिन् हयवरलण् इति सूत्रकरणे किं मानम्, तथा अहत्याहाराभावेऽपि कथं तत्कार्यसिद्धिरितीमे विषयाः यथामति प्रस्तूयन्ते।

**हयवरलण्**

पञ्चमं प्रत्याहारसूत्रमिदम्। एतादृशसूत्रस्वरूपं व्याकरणान्तरेषु न दृश्यत इति अभिनवमेवात्र भोजव्याकरणे। ह य व र ल इत्येवं वर्णान् तथा पूर्ववर्णाश्चोपदिश्य अनन्तो णकारमितं करोति प्रत्याहारार्थम्। प्रत्याहारो हि लाघवेन शास्त्रप्रवृत्त्यर्थः। तस्य च णकारस्य ग्रहणं त्रिभिः भवति। अविधीयमानोऽण् ससवर्णः (सर-1.2.4) इत्यकारेण। अइउण् इति सूत्रस्थने अकारेण सह हयवरलण् इति सूत्रस्थस्य णकारस्य उच्चारणेन अयम् अण् इति प्रत्याहारो जायते। तथैव 'इणः कित्' (सर-2.2.228) इकारेण द्वितीयः। अइउण् इति सूत्रस्थस्य इकारस्य प्रकृतसूत्रस्थेन णकारेण सह उच्चारणेनायं इण् इति प्रत्याहारो जायते। 'इको यणचि' (सर-6.1.86) इति यकारेणापि तस्योच्चारणं भवति। तथाहि एतत्सूत्रस्थेन यकारेण सह प्रकृतसूत्रस्थस्यैव णकारस्योच्चारणेनायं प्रत्याहारो निष्पद्यते।

अस्मिंश्च सरस्वतीकण्ठाभरणव्याकरणे इण्ग्रहणानि सर्वाण्यपि हयवरलण् सूत्रस्थेन णकारेण। अण्ग्रहणं तु पूर्वेण णकारेण। किन्तु 'अविधीयमानोऽण् ससवर्णः' इति सूत्रे परेणाण्ग्रहणं, तथा 'दीर्घादणि समानपादे' (सर-8.2.128) इत्यत्रापि सूत्रे परेणाण्ग्रहणम्। यथा पाणिनीये 'अणुदित्सवर्णस्य चाप्रत्ययः' (अष्टा.-1.1.69) इत्यत्र सूत्रे केवलं परेणाण्ग्रहणं तथा अत्र सूत्रद्वयेऽस्मिन् परेणाण्ग्रहणम्।

अत्र प्रत्याहारसूत्रे जातिनिर्देशो वर्तते। जातिनिर्देशादेव सँय्य्यन्ता सँव्वत्सरः इत्यादौ द्विर्वचनं सिद्धति। तथा हि सम् यन्ता इत्यवस्थायां मकारस्यानुस्वारे तथा तस्य परसवर्णे

सर्य्यँन्ता इति जाते अत्र जातिपक्षाश्रयणादनुनासिकयकारस्यापि यकारेण ग्रहणात् अचः परस्य यरः अनुनासिकयकारस्य द्वित्वे सँय्य्यन्ता इति रूपं जायते । तथैव संव्व्वत्सरः इत्यत्रापि प्रस्तुतसूत्रे जातिपक्षाश्रयणात् अनुनासिकवकारस्य वकारेण ग्रहणात् 'अचि वा' (सर-7.3.57) इति शास्त्रप्रवर्तनात् प्रकृतरूपं जायते।

न केवलं जातिपक्ष एवाश्रितः परम् अइउण् इति सूत्रवदत्र व्यक्तिपक्षोऽप्याश्रितः । व्यक्तिपक्षग्रहणे तु 'अविधीयमानोऽण् ससवर्णः' इति शास्त्रं मानम्।

**विमर्शः**

तत्रभवान् भोजराजः व्याकरणेऽस्मिन् हयवरट् लण् इत्येते सूत्रे एकीकृत्य हयवरलण् इत्येकमेव सूत्रं निर्मितवान् । तेन हि तन्मते नैतेषां प्रत्याहारसूत्राणां शिवसूत्रत्वं श्रुतित्वं ब्रह्मप्रतिपादकत्वं सनकाद्युद्धारकशक्तित्वं वा वर्तते, अन्यथा चतुर्दशसूत्राण्येव कुर्यान्न तु त्रयोदश । तस्मात्प्रत्याहारसम्पादनाद्भिन्नं न किञ्चिदेषां प्रयोजनं भोजपरम्परायाम् । प्रत्याहारसूत्रणाञ्च हृदयहारिणीवृत्तिः न केवलमर्थतोऽअपि तु शब्दतोऽपि चान्द्रवृत्तेरनुकृतिरिति सुस्पष्टमेव।

हयवरलण् इति मिश्रसूत्रविधाने तथा टकारानुबन्धं प्रत्याख्याय अहृत्याहारकार्यं कथमन्यथा सम्पाद्यते तदेव प्रकरणस्यास्य वैशिष्ट्यम् । वस्तुतः टकारानुबन्धप्रत्याख्यानं तथा द्वयोः सूत्रयोः एकीकरणं नास्य व्याकरणस्य अपि तु चान्द्रव्याकरणस्योद्भावनम् । प्रक्रियासौकर्यार्थं चात्र व्याकरणे तद्गृहीतमित्येव । पाणिनीयव्याकरणे टकारेण अट् इत्येक एव प्रत्याहारः निर्मितः । तस्य च प्रत्याहारस्य चतुर्षु स्थलेषु प्रयोगो दृश्यते, तद्यथा – 'दीर्घादटि समानपादे' (अष्टा.- 8.3.9), 'आतोऽटि नित्यम्' (अष्टा.-8.3.3), 'अट्कुप्वाङ्नुम्व्यवायेऽपि' (अष्टा.-8.4.2), 'शश्छोऽटि' (अष्टा-8.4.63) इत्येतेषु । सूत्रेष्वेषु आद्यं सूत्रद्वयं तावत् छान्दसम् । अन्यच्च द्वयं लौकिकम् । 'अट्कुप्वाङ्नुम्व्यायेऽपि' इति सूत्रे अहृत्याहारः समाश्रितः पाणिनीयैः । परमिह सरस्वतीकण्ठाभरणव्याकरणे नास्त्येव टकारानुबन्धौऽतोऽहृत्याहाराभावात् कथं तत्सिद्ध्यतीति चेत् तदर्थं सूत्रमेतत्परित्यज्य तत्स्थले सूत्रमाह भोजराजः – 'चुटुतुलशर्व्यवाये (सर-7.4.145)2 इति । तेन चवर्गटवर्गतवर्गैः लकारेण शर्भिः व्यवधाने णत्वं नैव भवतीति ज्ञायते । एवमिह एतेषां वर्णानां व्यवधाने सति न भवति णत्वम् । रामेन इत्यत्र नकारस्य णत्वविधानाय पाणिनिना अटकुप्वाङनुम्व्यवायेऽपि इति सूत्रमवतारितम् । तेन रेफषकाराभ्यां परस्य नस्य णत्वं भवित अट् कवर्गः पवर्गः आङ् नुम् इत्येतेषां व्यवधाने सत्यपि । एतेषां वर्णानां व्यवधाने सत्यपि नकारस्य णत्वं विहितं पाणिनिना । परं भोजेनेह मार्गान्तरेण सूत्रं कृतम् - 'चुटुतुलशर्व्यवाये' इति । पाणिनिनये तत्तद्वर्णानां व्यवधाने सत्यपि णत्वं विधीयते किन्त्विह चवर्गादीनां व्यवधाने सति णत्वं प्रतिषिध्यते । एवं वस्तुतः चवर्गादीनां व्यवधाने न भवति णत्वं परं तदितरेषां सर्वेषामपि व्यवधाने रेफषकाराभ्यां परस्य नकारस्य णत्वं भवत्येव इति तत्त्वम् । एवम् अहृत्याहाराभावेऽपि तत्कार्यं साधयितुं शक्यते । तेन च इतोऽपि स्पष्टता सञ्जाता यत्

चवर्गटवर्गतवर्गैः लकारेण शर्भिश्च व्यवाये सति णत्वं न भवति अन्येषां व्यवाये सत्यपि जायते एव णत्वमिति।

तथैव 'शश्छोऽटि' इति सूत्रेऽपि अङ्त्याहारस्य प्रयोगः पाणिनिना कृतः । पदान्तात् झयः परस्य शस्य छः वा स्यादटीति तत्सूत्रार्थः । तद् शिव इत्यत्र दस्य श्चुत्वेन जकारे कृते जकारस्य चकारो जायते, ततश्च अङ्रत्वात् शकारस्य विकल्पेन छत्वे तच्छिवः, तच्शिवः इति रूपद्वयं जायते । परं यत्र सरस्वतीकण्ठाभरणव्याकरणे अङ्त्याहारो नास्त्येव तत्र कथं व्यवस्था इति चेत् भोजराजेन तु तत्स्थले 'चयः शश्छोऽसि' (सर-7.4.177) इति सूत्रं विहितम् । अम्प्रत्याहारस्त्वस्त्येव तन्मतेऽपि, अतस्तेनैव स प्रकृतेऽपि कार्यं साधयति । वस्तुतः 'छत्वममीति वाच्यम्' इति वार्तिककारमतमेवात्र एतादृशसूत्रकरणे वीजम् । तच्छ्लोकेन इत्यादिरूपसिद्ध्यर्थं अमीति वक्तव्यम् । कारणं यदि अटि परे पदान्तात् झयः परस्य शकारस्य छकारः इत्यर्थो शश्छोऽटि सूत्रस्य । परं तत् श्लोकेन इत्यत्र अङ्रत्वाभावात् नैव शकारस्य छकारो लकारस्य अटु पाठाभावात् । परं शश्छोऽमीति सूत्रं क्रियते चेत् तत्तु सिद्ध्यति लकारस्य अम्प्रत्याहारे सद्भावात् । एवं वार्तिककारमतं पर्यालोच्यैव वस्तुतः सरस्वतीकण्ठाभरणकृता 'चय शश्छोऽमि'[3] इति सूत्रं कृतम् । तस्मात् वार्तिककारवचनमेव भोजराजस्य सूत्रशरीरपरिवर्तने मूलाधारः । चान्द्रव्याकरणे अपि एतद्विषयकं सूत्रं 'शश्छोऽमि' इति।

'दीर्घादटि समानपादे' इत्यत्र सूत्रेऽपि अङ्त्याहारस्य प्रयोगो वर्तते । दीर्घात्परस्य पदान्तस्य नकारस्य रुः भवति अटि परतः समानपादे इति सूत्रार्थः । महान् इन्द्र इत्यत्र दीर्घादाकारात्परस्य पदान्तस्य नकारस्य रुँत्वे महारुँ इन्द्र इति जाते ततः 'आतोऽटि नित्यम्' इति नित्यमनुनासिके प्रक्रियायां च महाँ इन्द्र इति रूपम् । एवम् अङ्त्याहारसत्त्वादेव 'दीर्घादटि समानपादे' इति शास्त्रं प्रवर्तते ततश्च इष्टं रूपं निष्पद्यते । कथं च अङ्त्याहाराभावे भोजव्याकरणे सिद्धिरिति चेत् अत्र भोजराजः 'दीर्घादटि समानपादे' इति पाणिनीयसूत्रं किञ्चित्परिवर्त्य 'दीर्घादणि समानपादे' इति सूत्रं निर्मितवान् । अङ्त्याहाराभावेऽपि इकारस्य अण्प्रत्याहारान्तर्भावात् 'दीर्घादणि समानपादे' इति सूत्रे कृते अपि पूर्वोक्तं रूपं सिद्ध्यतीत्याशयेन 'दीर्घादणि समानपादे' इति सूत्रं सरस्वतीकण्ठाभरकृता विहितम्।

एवमेव 'आतोऽटि नित्यम्' इत्यत्रापि अङ्त्याहारस्य प्रयोगः दृश्यते । अटि परतः रोः पूर्वस्य आतः स्थाने नित्यमनुनासिको भवतीति सूत्रार्थस्तस्य सूत्रस्य । महाँ इन्द इत्यादौ सूत्रस्यास्य प्रवृत्तिः । महारुँ इन्द्र इत्यवस्थायामिह रुँत्वात्परं अट्वर्णः इकारोऽस्ति, रुँत्वं च पदान्ते वर्तते तथा रुँत्वात्पूर्वमाकारोऽपि विद्यते इत्यतः 'आतोऽटि नित्यम्' इत्यनेन शास्त्रेण नित्यमनुनासिकादेशः तेन महाँ इन्द्र इति रूपं जायते । एवमिह वस्तुतः 'अत्रानुनासिकः पूर्वस्य तु वा' (अष्टा-6.3.2) इत्यनेन शास्त्रेण विकल्पेन अनुनासिकादेशे प्राप्ते नित्यं तद्यथा स्यादित्येतदर्थं प्रकृतं सूत्रम् । एवमनेन सूत्रेण तावत् नित्यमनुनासिकादेशो विधीयते परं वेदेषु बहुत्र अनुनासिकादेशस्थले अनुस्वारप्रयोगः कृतो दृश्यते । तेन देवान् ऋतुभिः कल्पयाति,

तथा देवाऱ्ँ ऋतुभिः इत्येवं रूपद्वयं दृश्यते। वैकल्पिकविधानं तु 'अत्रानुनासिकः पूर्वस्य तु वा' इत्यनेन शास्त्रेणैव विहितम्। तस्माल्लक्ष्यानुरोधेन व्यवस्थासिद्धौ सूत्रमिदं निष्प्रयोजनमिति चिन्त्यते । एवं यदि वैकल्पिकविधानमेवेष्टं स्यात्तर्हि प्रस्तुतसूत्रस्य फलं चिन्त्यमिति वैयाकरणसिद्धान्तकौमुद्यामपि प्रोक्तम् । काशिकायामपि ''केचिदनुस्वारमधीयते स च च्छान्दसो व्यत्तयो द्रष्टव्यः'' इति मतं दृश्यते । एवमिदं काशिकाकारमतं मनसि निधाय किञ्चिदपि सूत्रं भोजराजेन न सूत्रितम्। वस्तुतः काशिकावदत्रापि छान्दसो व्यत्ययेन रूपद्वयं सिद्ध्यतीति सरस्वतीकण्ठाभरणकारस्याप्यभिमतम्।

अहृत्याहाराभावेऽपि कथं तत्तत्कार्यसिद्धिरिति सविस्तरं प्रपञ्चितमिह । चान्द्रमते अण् इति प्रत्याहारः पूर्वणकारेणैवेति एक एव । अहृत्याहारकार्यमन्यथैवोपपादितं चान्द्रव्याकरणानुसारिभिः, तथैव च सरस्वतीकण्ठाभरणकृता तट्टीकाकारेणापि । परं भेद इयानेव यत् सरस्वतीकण्ठाभरणे द्वितीयोऽपि अणप्रत्याहारः वर्तते, तथा व्यक्तिपक्षोऽपि समाश्रितः । एवमहृत्याहारकार्याणि साधयितुमेव प्रत्याहारान्तरस्य सूत्रान्तरस्य भाष्यवार्तिकस्य वा आश्रयणं क्रियते चान्द्रव्याकरणे । 'हयवरलण्' इति एकं प्रत्याहारसूत्रकरणं वस्तुतः सारल्यसम्पादनाय एव । परं यदि द्वितीयस्य अण् प्रत्याहारस्य किञ्चित्कार्यमेव न स्यात्तर्हि तत्प्रत्याहारकरणे न किञ्चिन्मानम् । वस्तुतः कश्चन वर्णस्तु अनुबन्धत्वेनोपदेष्टव्य इति णकार एवोपदिष्टः । परं तस्य णकारानुबन्धस्य कार्यं तु नास्ति चान्द्रव्याकरणे । तेन हयवरलण् इति सूत्रस्थले टकारानुबन्धोऽङ्गीकार्यस्तेन अहृत्याहारकार्याणि यानि मार्गान्तरेण साधितानि तान्यपि सिद्ध्यन्तीति चेन्न । वस्तुतः लकारव्यवधाने णत्वं नेच्छति चन्द्रगोमी, 'चुटुतुलशर्व्यवाये' इति सूत्रकरणात्। टकारानुबन्धे कृते सति अट् इति प्रत्याहारो जायते। पुनश्च 'अटकुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रं क्रियते चेदपि तत्र अहृत्याहारे लकारस्यान्तर्भावात् लकारव्यवधाने अपि णत्वं जायते । किन्तु लकारव्यवधाने णत्वं नेष्यते । अतः हयवरलण् इति णकारानुबन्धकरणेऽपि न दोषः । सरस्वतीकण्ठाभरणे तु एतादृशः आक्षेपो न कार्यः। तत्र द्वितीयोऽपि अणप्रत्याहारः स्वीकृतः। पुनश्च लकारव्यवधाने अत्रापि णत्वं नेष्टम् । अतः यथोपदिष्टः भोजराजक्रम एव युक्ततरो भाति। प्रत्याहारसूत्रेषु वर्णाः येन क्रमेण उपदिष्टाः तेनैव तेषामुपदेशो युक्तः। वर्णानां क्रमभङ्गे तु तत्तत्प्रत्याहारकृतं कार्यं न सिद्ध्यति। तादृशसूत्रकरणेन हि सारल्यं सौकर्यं लाघवञ्च जायते। सरस्वतीकण्ठाभरणे तु तथा न सम्भवति कारणं अत्र अस्ति तस्यापि प्रत्यापि प्रत्याहारस्य प्रयोजनम्।

**उपसंहृतिः**

एवमिह शोधप्रबन्धे सरस्वतीकण्ठाभरणव्याकरणानुसारेण 'हयवरलण्' इति प्रत्याहारसूत्रस्य यथामति हृदयहारिणीदर्शितमार्गेण तथा ग्रन्थान्तरैः सह प्रतोल्य अध्ययनं प्रस्तुतम्। अनेन च भोजव्याकरणस्यापि परिचयः प्रसारश्च स्यादित्याशास्महे।

**सन्दर्भाः**

1. नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
   उद्धर्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम्।।
2. अस्य वृत्तिः मुद्रितग्रन्थे नास्ति। केवलं षष्ठाध्यायान्तमेव हृदयहारिणीवृत्तिः मुद्रिता प्राकाश्यं च गता। अतः एतत्सूत्रवृत्त्यभावो वर्तते। परं चन्द्राचार्यानुरोधेन तु सूत्रार्थो निष्पादयितुं शक्यः। तथा हि चान्द्रसूत्रम् - चुटुतुलशर्व्यवाये (चान्द्र-6.4.132) इति। सूत्रव्याख्यानमप्येवं वर्ततेचवर्गटवर्गतवर्गैः लकारेण शर्भिश्च व्यवधाने णत्वं न भवति। अर्चनम्, मूर्छनम्, सर्जनम्। एभिरिति किम्? करणम्, गिरिणा, मूर्खेण, अर्धेण, रेफेण, पूर्वेण, वृंहणम् इत्यादि। एवमिह चान्द्रसूत्रं तथा भोजसूत्रं समानमेव तथैव तयोः सूत्रार्थोऽपि समानः।
3. 'शरछोऽटि' इत्यत्र सूत्रे' झयो होऽन्यतरस्याम्' इति सूत्रात् झयः इति पदमनुवर्तते। तेन झयः परस्य शस्य छो भवति अटि परे। तच्छिवः इत्यादौ तद् शिव इत्यवस्थायां श्रुत्वे जकारे, चर्त्वे चकारे प्रकृतसूत्रेण विकल्पेन च्छकारे तच्छिवः इति रूपम्। अत्र पाणिनिना वस्तुतः पूर्वसूत्रं 'झयो होऽन्यतरस्याम्' इति कृतमेव तस्मात् ततः झयः इति पदमनुवर्त्य चर्त्वादिकं विधाय 'शश्छोऽटि' इति सूत्रकार्यं सम्पादितम्। परं वस्तुतः चयः परस्य शस्य च्छत्वं विधीयते। पाणिनिपरम्परायां झयः इति पूर्वसूत्रादनुवर्तते। परं सरस्वतीकण्ठाभरणे झयः इति पदं पूर्वसूत्रे कुत्रापि नास्ति। अतः साक्षात् चयः इति पदं स्वीकृतम्। तेन चयः परस्य शस्य च्छत्वम्।

**परिशीलितग्रन्थाः**


1. पतञ्जलिः 2018 महाभाष्यम् (भाष्यप्रदीपोद्योत्समुल्लसितम्)। भार्गवशास्त्री जोशी (संशोधकः) दिल्ली चौखम्बा संस्कृत प्रतिष्ठान।
2. पाणिनिः 2013 अष्टाध्यायी वाराणसीः चौखम्बा सुरभारती प्रकाशन।
3. भोजः 1937 सरस्वतीकण्ठाभरणम् (मूलमात्रम्) टि.आर चिन्तामणिः (सम्पा.), मद्रास विश्वविद्यालयः।
4. भोजः 1935 सरस्वतीकण्ठाभरम् (हृदयहारिणीसहितम्), प्रथमभागः शामबशिव शास्त्री (सम्पा.) त्रिवेन्दम्ः अनन्तशयन विश्वविविद्यालयः।
5. भट्टोजीदिक्षितः 2010 वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीसहिता) प्रथमो भागः, गिरिधरः शर्मा (सम्पा.) दिल्ली, मोतीलाल बनारसीदासः।
6. भर्तृहरिः 1979 वाक्यपदीयम् (प्रकाश-अम्बाकर्त्रीव्याख्यासहितम्) तृतीयं काण्डं, द्वितीयो भागः भागीरथप्रसादः त्रिपाठी (सम्पा.) वाराणसीः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।
7. वामनजयादित्यौ 2016 काशिका(न्यासपदमञ्जरीभावबोधिनीसहिता) प्रथमो भ्भागः जयशङ्करलालः त्रिपाठी (सम्पा.) वाराणसीः तारा बुक एजेन्सी।
8. शास्त्री विश्वनाथ 1996 सरस्वतीकण्ठाभरण का समीक्षात्मक इतिहास, दिल्ली परिमल पब्लिकेशन्स।
9. चन्द्रगोमी 1953 चान्द्रव्याकरणमृ (प्रथमो भागः) च्यटार्जी क्षितिशचन्द्र (सम्पा.) पुणेः देकान कलेज।

UGC - CARE Listed

पाणिनीया
Vol. XXX, Year IX

# धर्मशास्त्रेषु प्रतिपादितयोः नामकरणान्नप्राशनसंस्कारयोः व्यावहारिकता

**डॉ. पंकजाघईकौशिकः***

**सारांशः**

संस्कारः जीवनयात्रां विधीयमानमनुष्ठानमित्यवगम्यते । अशेषजगतः संस्कृतौ संस्काराः विद्यन्ते । इमे संस्काराः मानवजीवनस्य विविधयस्थलेषु भूयमानान् महदवसरान् प्रदर्शयन्ति। सामाजिकप्रतिष्ठातम् अप्यवाप्तुं संस्काराः अनुष्ठीयन्ते। मानवस्य समग्रविकासस्य कल्याणस्य च सम्पादनं समाजेन विश्वेन वा सह भवेदिति संस्काराणाम् अनुष्ठानस्य प्रमुखम् उद्देश्यं वर्तते । संस्कारैः जीवनं शुद्धतामेति । शोधपत्रेऽस्मिन् नामकरणान्नप्राशनसंस्कारयोः महत्त्वविषयकमन्वेषणं क्रियते । एतयोः संस्कारयोः मानवजीवनेन सह व्यवहारः वर्तते । धर्मशास्त्रकारैः एतयोः संस्कारयोः विषये निर्धारिताः विविधसिद्धान्ताः अत्र प्रस्तूयन्ते।

जीवनविकासस्य विविधचरणाः शारीरिकक्रियारूपिणः एव न सन्ति अपि तु जीवनविकासः बुद्ध्या भावनया आध्यात्मिकोन्नत्या च सह सम्बद्धः भवति । जार्जकार्दोनामहोदयेन संस्काराणाम् उत्तम विश्लेषणं विहितं....

'वस्तूनां यथायोग्यं संस्कारो भवति । तद्यथान्नस्य पाकादिना गुणविशेष आधीयते पाकात्पूर्वं चौदनस्यावहननादि संस्कारो भवति । तद्वद्रव्यस्य शुद्धौ स्मृतिकारैः संस्कारो विहितः यथा कांस्यपात्रस्य भस्मना शोधनम् । यथैवान्नादीन्यचेतनानि द्रव्याणि संस्क्रियन्ते तथैव पुरुषोऽपि संस्क्रियते । तद्यथा केशश्मश्रुवपनदन्तधावननखकर्तनस्नानैर्यजमानो यज्ञियो भवति।'[1]

भारतीयमनीषिभिः मानवस्य जगति आगमनप्रक्रियायाः प्रारभ्य तस्य जातकर्मसु जीवनकालस्य विविधप्रसंगेषु च शेषसमाजस्य प्रतिभागितां सुनिश्चितं माध्यमरूपेण निर्मिताः संस्काराः । इमे संस्काराः न केवलम् अमंगलपरिहारस्य यज्ञानुष्ठानेन

*संस्कृतविभागः लेडीश्रीरामहाविद्यालयः, दिल्ली

सांस्कृतिकमहत्त्वप्रतिपादनस्य च साधनरूपाः अभवन् अपि तु मानवस्य सामाजिकतायाः प्रमुखधाराः अपि अभवन् । वैदिकर्षीणाम् अद्भुतम् अतुल्यञ्च ज्ञानं कथं नु व्यवहारे कार्यान्वयने च अनुष्ठीयते इत्यस्य सर्वश्रेष्ठोदाहरणभूताः सन्ति धर्मशास्त्रान्तर्गते प्रतिपादिताः संस्काराः । प्राचीनसमाजशास्त्रस्य अधिगमनस्य प्रक्रियायां तत्समाजस्य आदर्शान् महत्वाकाङ्क्षाश्च अवगन्तुं संस्कारविधीनां अध्ययनम् अपेक्षितमस्ति । प्रत्येकं समाजं स्वकीयमूल्यानि धारणाश्च जीवयितुं सुरक्षितुं सततप्रयत्नरतो भवति । एतदर्थं सामाजिकानुशासनस्य आवश्यकता अनुभूयते । तदावश्यकतायाः सुफलमाध्यमाः सन्ति संस्काराः । भारतीयसमाजस्य दृढव्यवस्थायाः पृष्ठे मूलाधाररूपेण द्वौ तत्त्वौ संस्थितौ स्तः, एकं तु नियमितजीवनम् अपरं च अनिवार्यसंस्काराः । मूल्यगर्भिताः विचाराः अन्तर्शक्तिः एतेषु विचारेषु मूल्येषु च निहिता, तया एव तत्समाजस्य पोषणमेधते । संस्कारेषु जीवनव्वहारस्योपयोगिता अपि उपलभ्यते । जीवनविकासस्य विविधावसरेषु इष्टप्राप्तये अनिष्टपरिहाराय च काले काले समाजेन सह सम्पर्कसाधनाय जीवनस्य विविधावस्थानाम् उत्सवसम्पादनाय च संस्काराः अनुष्ठीयन्ते । संस्कारप्रकाशे महर्षिअंङ्गिरसा संस्काराणाम् उपमा चित्रकर्मणा कृता, यथा चित्रकर्मणः साफल्यमवाप्तुं विविधाः वर्णाः अपेक्षिताः तथैव संस्कारैः एव मानवः ब्राह्मण्यरूपं साफल्यम् अवाप्नोति ।[2] अनेन अङ्गिरोवचनेन मानवाय ब्राह्मण्यावस्थायाः प्राप्तेः विधानं विहितम् । भारतीयजीवनदर्शने सामाजिकव्यवहारेण सहैव समानान्तररूपेण आध्यात्मिकोत्थानस्य सततप्रक्रियायाः उत्तमविचारः अपि भारतीयमनीषिभिः प्रतिपादितः । देहोऽयं न केवलं पञ्चतत्त्वमयस्थूलभौकितत्त्वम् अपितु देहमाध्यमेन दुर्लभमानवजीवनस्य आध्यात्मिकविकासः अपि अपेक्षितः अनिवार्यश्च । संस्कारैः भौतिकाध्यात्मिकयोः उत्थानयोः मध्ये सेतुः निर्मीयते । मर्त्यः देहोऽयं संस्कारैः परिष्कृतः भूत्वा देहिनः अधिष्ठानं भवति । संस्कारानुष्ठानेन संस्कृतः मानवः भौतिकरूपे अवस्थितोपि आध्यात्मिको भवति।

**संस्कारो हि गुणान्तराधानमुच्यते।**

दुर्गुणान् दूरीकृत्य सद्गुणानाम् आधानमेव 'संस्कारः' । अत्र जिज्ञासा वर्तते यत् किं वस्तुतः संस्कारैः ब्राह्मण्यमेतुं शक्यते ? किं संस्कारानुष्ठानेन दुर्गुणानां परिमार्जनं कृत्वा आध्यात्मिकोत्थानं सम्भवं वा ? श्रुतेः उत्तरमस्ति - आम् । अस्य व्याख्या उपनिषत्सु लभ्यते। बृहदारण्यकोपनिषदि[3] अन्नमयशरीरस्य वर्णनमस्ति । मानवशरीरं अन्नमयं । अन्नमयशरीरोऽयं स्थूलशरीरं उच्यते। स्थूलशरीरेऽस्मिन् विद्यमानस्य सूक्ष्मशरीरस्य निर्मितिः प्रकृतेः सूक्ष्मतत्त्वैः भवति। श्रुतिकथनम् अस्ति – 'लिङ्गं मनः' सूक्ष्मशरीरः मनःप्रधानं। अस्माभिः कृतानां कर्मणां संस्काराः मनसि तथैव संसक्ताः यथा पुष्पेषु गन्धः । अतः संस्कारैः विशुद्धः जीवात्मा सौकर्येणैव ब्राह्मण्यमधिगच्छति।

अत्र प्रमुखतः गृह्यसंस्काराः वर्णिताः येषां सम्पादनस्थलं गृहमस्ति प्रमुखसम्पादकः गृहपतिः वर्तते । अग्नेः सम्मुख मन्त्रोच्चारणसहितं संस्काराः विधीयन्ते । वैदिकसंहितासु

गृह्यसंस्काराणां प्रत्यक्षोल्लेखः न प्राप्यते परं तु गृह्यसूत्रेषु गृह्यसंस्काराणां विस्तरेण विधानं विहितम्। धर्मशास्त्रीयग्रन्थेषु संस्काराणां सम्पादनस्य प्रयोजनद्वयं निर्धारितम्। राजबली-पाण्डेयमहोदयेन गृह्यसंस्काराणां प्रयोजनं द्वयोः वर्णयोः विभक्तम्। तत्र प्रथमं प्रयोजनं प्रमुखतः अनिष्टनिवारणेन सम्बद्धम्।[4] भारतीयानां मनीषीणां विश्वासः आसीत् यत् संसारोऽयं मानवेतरप्रभावैः परिवृतः। मानवेतरप्रभावाः इष्टानिष्टसम्पादने समर्थाः सन्ति। अतः अमाङ्गलिकप्रभावानां निराकरणाय हितकरप्रभावाणां प्राप्तये च प्रयत्नाः क्रियन्ते स्म। एते प्रयत्नाः संस्काराणामन्तर्गते उल्लिखितानां नानाविधसाधनानां अवलम्बनेन सम्पाद्यन्ते स्म। इष्टप्राप्तिसंदर्भे संस्कारणां भौतिकोद्देश्यं अपि दृश्यते। गृह्यसंस्काराः गृह्यकृत्याः आसन् तेषामनुष्ठानावसरे धनधान्यपशुसंततिसमृद्धिशक्तिबुद्धी इत्यादिनां प्रार्थना क्रियते स्म।

**सांस्कृतिकप्रयोजनम् –** संस्काराणां सम्पादनावसरे क्रियमाणयज्ञानुष्ठानप्रसङ्गे प्रयोज्यमानैः वस्तुभिः उच्चार्यमाणैः मन्त्रैः विविधक्रियाविधिभिश्च संस्कृतेः प्रसारणं भवति। एतेन सहैव भौतिकमूल्याणां स्थापना अपि अन्यतमं प्रयोजनम्। नानाधर्मशास्त्रेषु उद्धृतान् षोडशसंस्काराः उल्लिखिताः। एतेषां षोडशसंस्कारणां पुनः वर्गीकरणं कृतम् - प्राग्जन्मसंस्काराः, बाल्यावस्थायाः संस्काराः, शैक्षिकसंस्काराः, विवाहसंस्कारः अन्त्येष्टिसंस्कारश्च। तेषु एकादशसंस्काराः तु बाल्यावस्थया सम्बद्धाः। तेष्वेकादशत्वपि नामकरणान्नप्राशनसंस्कारौ अन्यतमौ।

नामकरणसंस्कारः

सामाजिकस्तरे व्यवहाराय मानवस्य नाम्नः अतीवमहत्त्वं खलु। स्वकीयेन नाम्ना एव मानवः कीर्तिम् अवाप्नोति। संस्कारप्रकाशे बृहस्पतिना नामकरणयस्य आवश्यकता प्रतिपादिता–

**नामाखिलस्य व्यवहारहेतुः शुभावहं कर्मसु भाग्यहेतुः।**
**नाम्नैव कीर्तिं लभते मनुष्यस्ततः प्रशस्तं खलु नामकर्म॥**[5]

धर्मशास्त्रकारैः नामकरणसंस्कारम् आधृत्य बहुविधाः सिद्धान्ताः प्रतिपादिताः। तद्यथा नाम्नः आधाराः के के स्युः ? बालकस्य बालिकायाः वा कति नामानि स्युः ? केन नाम प्रदातव्यम् ? नाम्नः कति अक्षराणि भवेयुः ? बालकानां बालिकानाञ्च नाम पृथक्पृथकैः अक्षरैः स्यात्। सामाजिकदृष्ट्या वर्णानामाधारेण नामानि भवतिव्यानि इति कैश्चित् धर्मशास्त्रकारैः व्यवस्थितम्। सर्वैः शास्त्रकारैः चतुर्विधा आधाराः कथिताः तेषु नक्षत्राधारितं नाम, मासदेवताधारितं नाम, कुलदेवताधारितं नाम, लौकिकं नाम चेति सन्ति।

**नामकरणस्य कालः –** केचन मनीषिणः नामकरणस्य कालः प्रथमदिवसं निर्धारयन्ति। आश्वलायनशांखायनगृह्यसूत्रयोः शतपथब्राह्मणे च कथितं यत् पिता पुत्रस्य जाकर्मावसरे एव तस्मै नाम यच्छेत्।[6] आपस्तम्बबोधायनभारद्वाजपारस्करधर्मशास्त्रकारानुसारं जन्मतः दशमे दिवसे नामकरणं स्यात्। महाभाष्ये अपि दशमदिनस्य प्रावधानं विद्यते।[7] वैखानसानुसारं दशमे

द्वाद्वशे वा दिवसे शय्यायाः उत्थाय नामोच्चारणं करणीयम्। मनुना उदारसिद्धान्तः प्रदत्तः यत् दशमे द्वाद्वशे वा दिवसे अथ वा तदनन्तरं कस्मिञ्श्चिदपि शुभमुहूर्ते नक्षत्रे तिथौ वा नामकरणं कर्तुं शक्यते। प्रायः सर्वेषां मतं यत् दशदिनेभ्यः प्राक् संस्कारोऽयं न विधातव्यः। वस्तुतः उचितमसये शिशु आत्मपरिचयमवाप्नुयात्, यतो हि जन्मतः एकमासानन्तरं शिशु स्वरमवबोधयति, स्वरं प्रति प्रक्रियामपि करोति, अतः तदैव तस्य तस्याः वा नाम उच्चारणीयम् इति मनीषिणां कल्पना।

**नाम्नां संख्या –** नामसंख्याविषये अपि प्राचीनभारतीयमनीषिणः विचारितवन्तः। मानवस्य एकमेव नाम न स्यात्। उल्लेखः अस्ति यत् जन्मकाले एव पिता शिशोः कर्णे किञ्चन नाम उच्चारयेत्। तद्गुप्तनाम पिता एव जानाति। स्वनाम्ना सह कुलनाम्नः गोत्रनाम्नश्च योजनम् अपेक्षितम्। संस्कारप्रकाशे चतुर्विधनाम्नां वर्णनं कृतम्। नाक्षत्रनाम, मासदेवतानाम, कुलदेवतानाम, लौकिकनाम च। यस्मिन् नक्षत्रे शिशुः जातः तस्य नक्षत्राधारितनाम शिशवे दीयते। विविधनक्षत्राधारिताक्षराणि ज्योतिर्विद्भिः सुनिश्चितानि। यथा पुष्यनक्षत्रे जाताय शिशवे 'ह' अक्षरात् नाम दातव्यम्। एवमेव यस्मिन् मासे शिशोः जन्म अभवत् तस्य मासस्य देवस्य नामाधारितं नाम दीयते स्म। यथा मार्गशीर्षमासे जातस्य नाम जनार्दनः वासुदेवः वा इति भवेत्। पुराकालात् कुलविशिष्टे यस्य यस्याः वा आराधना क्रियते स सा वा क्रमशः कुलदेवः कुलदेवी वा भवति। तयोः आधारितानि नामानि तत्कुलस्य शिशवे दीयन्ते स्म। समाजे सामान्यरूपेण व्यवहर्तुं पृथक् नाम्नः विधानं कृतं शास्त्रेषु। लौकिकनाम मङ्गलसूचकं रमणीयम् अर्थपूर्णं च भवेत् इति वाञ्छना आसीत्।[8]

मनुना वर्णाधारितनाम्नाम् उल्लेखः कृतः। ब्राह्मणस्य नाम मङ्गलसूचकः, क्षत्रियस्य नाम बलसूचकः, वैश्यस्यनाम धनसूचकः, शूद्रस्य नाम सेवासूचकः स्यात्।[9] नामकरणसंस्कारणे सम्बद्धाः कतिचन नियमाः गृह्यसूत्रेषु निर्धारिताः।

- प्रायः सर्वेषु गृह्यसूत्रेषु निर्धारितम् यत् पुरुषस्य नाम द्वयोः अक्षरयोः चतुर्णामक्षराणां वा समसंख्यायुक्तं भवेत्।
- नाम्नः प्रारम्भः उच्चारणयोग्येन अक्षरेण स्यात्। मध्ये अर्धस्वरः स्यात्।
- केषुचित् सूत्रग्रन्थेषु उद्धृतम् यत् नाम्नः अन्ते विसर्गः तस्मात् च पूर्वं दीर्घस्वरः भवेत्।
- कस्यचित् ऋषेः देवस्य पूर्वपुरुषस्य वा नाम्नः निःसृतं स्यात्।
- पुत्रस्य पितुश्च समाननाम न भवेत्।

कन्यायाः नाम विषये अपि नियमाः आसन् –[10]

- दीर्घस्वरयुक्तं स्यात्।
- विषमसंख्यात्मकं भवेत्।
- त्रीणि अक्षराणि स्युः।

मनुना गृह्यसूत्रैः निर्धारितानां कठोरनियमानां स्थाने द्वौ सरलनियमौ स्थापितौ - प्रथमः सर्वेषां नाम शुभकारी शान्तिप्रदं च भवेत्। द्वितीयः ब्राह्मणवर्णस्य नाम्ना सह 'शर्म' इति पदं योजनीयम्।[11]

धर्मशास्त्रग्रन्थेषु मातृगोत्रनाम्नः उल्लेखः लभ्यते। यतः विवाहसमये मातुः पितुश्च गोत्रस्य परीक्षा अपेक्षिता इति आश्वलायनगृह्यसूत्रे उल्लिखितमस्ति ।[12] नाम्ना सह मातृगोत्रस्य संयोजनस्य बहुलानि नामानि शास्त्रेषु काव्येषु च प्राप्यन्ते। पूर्वमनीषिभिः मातुः पितुः गोत्रं प्रति समभावः प्रदर्शितः।

**अन्नप्राशनसंस्कारः**

जन्मानन्तरं प्रथमवारं शिशवे अन्नप्रदानं महत्त्वपूर्णः चरणः आसीत् । जन्मान्तरं शिशुः मातृदुग्धे एवाश्रितः भवति । देहस्य क्रमिकविकासानन्तरं मातृदुग्धेन सह अतिरिक्तभोजनम् आवश्यकम् । आवश्यकतामेताम् अवगम्य अवसरमिदं मानवाय संस्कारविधिषु सम्मिलितः अन्नप्राशनसंस्काररूपेण। सुश्रुतसंहितायां जन्मनः षण्मासानन्तरं लघुप्राशनप्रदानस्य प्रावधानं कृतम्। यतः भोजनं जीवनप्रदायितत्त्वमस्ति अतः भोजनप्रदानम् संस्काररूपेण परिणतम् । प्रसङ्गेऽस्मिन् अपि देवानाम् आह्वानं कृत्वा समुचितमन्नं शिशवे खादनीयं येन तस्य भौतिकशरीरं पुष्टिमवाप्नुयात् । न केवलं प्रथमवारम् अन्नदानं अपितु कस्मिन् समये कीदृशं भोजनम् कथं च दातव्यं कश्च खाद्यं खादयति इति विषयेषु गाम्भीर्येण विचारः विहितः । गृह्यसूत्रानुसारं अन्नप्राशनसंस्कारे जन्मतः परं षष्ठे मासे लघुमृदुभोजनं शिशवे खादनीयम् । अथवा यदा प्रथमदन्तदर्शनं स्यात् तदा अपि दातव्यम् ।[13] नारदेन षष्ठमासम् अतिरिच्य अष्टमे नवमे दशमे वा मासे अपि अन्नप्राशनसंस्कारविधानस्य प्रावधानं कृतम् । वस्तुतः वर्तमानसमये बालचिकित्सकाः षण्मासानन्तरमेव लघुमृदुभोजनप्रदानस्य परामर्शं यच्छन्ति। तत्रापि सिद्धान्तः अस्ति यत् षष्मासानन्तरम् अथवा यदा अपि शिशोः भारः षट्किलोमितो भवति तदा एव मातृदुग्धेन सह लघुमृदुभोजनं दातव्यम्। स्पष्टमिदं प्रायशः षण्मासानन्तरं शिशोः भारः षड्किलोमितं भवति तस्य अङ्गानि अपि भोजनं पाचयितुं सक्षमाणि भवन्ति। कासुचित् परिस्थितिषु शिशोः भारः यावत् षड्किलोमितं न भवति तर्हि तस्य अङ्गानि अन्नं पाचयितुं न सक्षमाः अतः प्रथमवारं अन्नप्राशनं तदैव भवेत् यदा शिशोः अङ्गानि तदन्नं पाचयितुं सक्षमाः भवेयुः। पूर्वमनीषिणां अपि इदमेव मन्तव्यम्।

सामान्यतः प्रथमभोजनस्य प्रकाराः नियमाश्चासन्। सर्वेषां मनीषिणां विचारः यत् शिशवे सर्वविधं सर्वरसयुक्तं भोजनं खादनीयम् । प्रथमवारं दधिमधुघृतमिश्रितं भोजनं खादनीयम् इति विधानं लभ्यते। ओदनदुग्धयोः मिश्रितक्षीरं रजतपात्रेण खादनीयम् इति परामृष्टम्। कीदृशमपि भोजनं स्यात् तद्भोजन स्वास्थ्यवर्धकं स्यात् इति सिद्धान्तः ।[14] अन्नप्राशनसंस्कारोऽपि मन्त्रोच्चारणसहितं सम्पादनीयः सर्वप्रथमं वाग्देवाय सिद्धभोजनस्य आहुतिं प्रदाय पिता मन्त्रोच्चचारणं कर्वन् शिशोः मुखे अन्नप्रदद्यात्। पारस्करगृह्यसूत्र[15] निर्दिष्टं

मन्त्रम् - **देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेषमूर्ज दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहेति।**

शिशोः समस्तेन्द्रियाणां पोषणाय प्रार्थनां कुर्यात्। ब्राह्मणभोजनानन्तरं संस्कारः पूर्णतामेति। अन्नप्राशनसंस्कारस्य एकः अन्यः पक्षः अपि यत् उचितावसरे मातृदुग्धस्य परिहारः भवेत्। चिरकालं यावत् मातृदुग्धस्य आश्रयम् मातुः शिशोः उभयोः एव कृते अहितकरः। पुनश्च समुचितकाले शिशुः अपि स्वावलम्बी भवेत् इति व्यवस्था पूर्वमनीषिभिः विहिता। शिशोः पेयानि खाद्यानि वा कानि स्युः ? अन्नस्य प्रारम्भः कदा स्यात् इति विषयस्य गाम्भीर्यम् अनुभूय भारतीयसर्वकारेण राष्ट्रियबालखाद्यनियमाः National gudielines on Infant and young Child feeding इति कार्यक्रमान्तर्गते प्रसारिताः।

**उपसंहारः**

प्राचीनभारतीयमनीषिभिः मानवजीवनं उन्नेतुं धर्मस्याश्रयः स्वीकृतः एतन्निमित्तञ्च जीवने विविधाः संस्काराः योजिताः। नामकरणसंस्कारस्य सिद्धान्तानामवलोकनं सिद्धयति यत् भारतीयमनीषिणाः व्याहारिकजीवनमालक्ष्य जागृताः सक्रियाश्चासन्। नाम्नः उत्तमप्रभावः मनुष्यस्य चरित्रे भूयादित्यपेक्षया नामकरण्स्य विविधोपयोगिनः विधानाः प्रस्तुताः। एवमेवान्नप्राशनसंस्कारस्य सूक्ष्मसिद्धान्ताः सूचयन्ति यत् भारतीयमनीषिणः शारीरिकविज्ञानस्य विशेषज्ञाः आसन्। मानवशरीरस्य विकासाय अपेक्षितान्नप्रक्रिया संस्कारक्रियया सम्पन्ना सञ्जायेत् इति विचिन्त्यान्नप्राशनसंस्काररूपिणी व्यवस्था समाजे स्थापिता। एतयोः संस्कारयोः उपरिकृतं विवेचनं प्राचीनमनीषिणां वैज्ञानिकमेधां प्रमाणयति। सिद्धान्ताश्च इमे वर्तमाने प्रभूततया प्रभाविणः प्रासङ्गिकाश्च सन्ति।

**सन्दर्भ**

1. कुमार, शशिप्रभा 'संस्कृतं संस्कृतिः संस्कारश्च' विद्यानिधि प्रकाशन, पृ. 3
2. चित्रकर्म यथाऽनेकैरंगैरुन्मील्यते शनैः।
   ब्राह्मण्यमपि सद्यद्वत् स्यात् संस्कारैर्विधिपूर्वकम्॥ - संस्कारप्रकाशः , पृ. 139
3. बृहदारण्यकोपनिषद् - 4.4.6
4. पाण्डेय, राजबली , 'हिन्दु संस्कार', पृ. 28-9
5. संस्कारप्रकाश, पृ. 24
6. तस्मात्पुत्रस्य जातस्य नाम कुर्यात्पाप्मानवेवास्य तदपहन्त्यपि द्वितीयमपि तृतीयम्।
   - शतपथब्राह्मण 6.1.3
7. महाभाष्यम् प्रथमखण्डः, पृ. 4
8. बृहस्पतिस्मृतिः 241
9. मङ्गल्यं ब्राह्मण्स्य स्यात् क्षत्रियस्य बलान्वितम्।
   वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम्॥ - मनु, 2.31
10. वीरामित्रोदय 1, पारस्करगृह्यसूत्रम् 1-17-3

11. मनुस्मृतिः 2-32
12. अभिवादनं च समीक्षेत तन्मातापितरौ विज्ञायेतामोपयननात्। - आश्वालयनगृह्यसूत्रम् 1-15-10
13. षष्ठे अन्नप्राशन जातेषु दन्तेषु वा। - वीरमित्रोदय, पृ. 267
14. षण्मासाश्चैतमन्नं प्राशयेल्लघुहितञ्च। सुश्रुतसंहिता - 10.64
15. पारस्करगृह्यसूत्रम् - 1-19

**सन्दर्भग्रन्थाः**


1. आश्वलायनगृह्यसूत्रम् (1944) आडयारपुस्तकालय
2. पारस्करगृह्यसूत्रम् (1980) चौखम्बाअमरभारती प्रकाशन , वाराणसी
3. बृहदाराण्यकोपनिषद् , गीताप्रेसगोरखपुर
4. मनुस्मृति (1946) कुल्लुकभट्टकृत मन्वर्थमुक्तावलीसहितम् निर्णयसागरप्रेस, बम्बई
5. वीरमित्रोदयंस्कारप्रकाशः चौखम्बासंस्कृतसीरिज
6. काणे, पाण्डुरंग वामन (1980) 'धर्मशास्त्र का इतिहास प्रथमभाग' अनुवादक- अर्जुन चौबे कश्यप उत्तरप्रदेश हिन्छी संस्थान
7. कुमार, शिशप्रभा (2009) 'संस्कृतं संस्कृतिः संस्कारश्च', पृ. 3, विद्यानिधिप्रकाशन, दिल्ली
8. पाण्डेय, राजबली (1978) 'हिन्दु संस्कार' चौखम्बाविद्यासागर, वाराणसी
9. मिश्र, डॉ. शिवशंकर (2018) 'भारतीय चिन्तन परम्परा में संस्कार' ईस्टर्न बुक लिंकर्स, दिल्ली

UGC - CARE Listed

**पाणिनीया**
Vol. XXX, Year IX

# संस्कृत-मध्यभारतीयार्यभाषयोः परिचयः वैशिष्ट्यञ्च

**डॉ. लक्ष्मीकान्तषडङ्गी***

**भूमिका**

भावावगाहिनी भाषा। स्वाशयं स्पष्टं परेषु समनुभावयितुम् आचरितः उपायविशेषः भवति भाषा। 'भास्'-स्पष्टप्रवचने धातुः। भाष्यते या सा भाषा। यया मनोगतो भावः प्रकटीक्रियते। भाषामन्तरेण न कोऽपि मनोभावम् अभिव्यक्तुम् शक्नोति। इह खलु जगति विद्यमाननानां सकलानां मनुष्याणां मध्ये परस्परम् ऐक्यसम्पादनार्थं भाषैव परमं कारणम्। एकभाषाभाषिणो जना हि परस्परसन्निकृष्टा जायन्ते। समभाषाभाषिणो लोकाः परस्परमात्मीयान् मन्यन्ते। अतः संक्षेपेणैव भाषा मनुष्यस्य मनोभावनायाः सुपरिकल्पित-ध्वनिमय-स्पष्टोच्चारित-विशिष्टवाचनभङ्गीसमन्वित-वाग्व्यवहारोऽस्ति। विभिन्नदेशेषु विराजन्ते विभिन्नाः भाषाः। परन्तु बहुभाषासमृद्धे अस्मिन् अखण्डे भारतभूखण्डे संस्कृतम् एव सा एका भाषा यया निर्विवादं सर्वत्र सर्वेषां भावविनिमयः ऐक्यस्थापनञ्च युगपदेव सिध्यति।

**संस्कृतभाषापरिचयः**

भारतीया हिन्दी-ओडिआ-वेङ्गली-तेलगु-तामेली-गुजराती-मराठी-मालायालमप्रभृतयः प्रान्तीयभाषा सर्वाः संस्कृतभाषायाः प्रादुर्भूता इति यथा यथास्माकं प्रत्ययो भविष्यति तथातथा तत् तत् मातृभाषाभाषिषु भारतीयेषु परकीयभावो दूरीभविष्यति, प्रत्युत तैः सह एकत्वस्य भावना वर्धिष्यते। न केवलं भारतीय आर्यभाषाः, अपि तु ग्रीक्-लाटिन्-जर्मान्-रसियान्-फ्रेञ्च-आंग्लप्रभृतयो वैदेशिकभाषा अपि अस्माकं भारतीयभाषापरिवारपरम्परायां वर्त्तन्त इति विदन्त्येव भाषातत्त्वविज्ञानिनः। अतो भाषाविज्ञानदृष्ट्या सर्वे वयमेकस्यैव परिवारस्य सदस्यभूताः। सर्वेषां भाषाविदामिदं निश्चिन्तं

---

* संस्कृतविभागाध्यक्षः, योगदा-सत्यङ्गपालपाडामहाविद्यालयः, पूर्वमेदिनीपुरम् , पश्चिमवङ्गः

मतमास्ते यत् नास्ति विश्वस्य काचिदपि भाषा यस्याः प्रभवः संस्कृतं न स्यात्। भारतीयानां तु सर्वासामेव भाषाणामुद्गमस्थलं संस्कृतभाषा वर्तत एव । भाषादृष्ट्या वाङ्मयदृष्ट्या च संस्कृतस्य उपादेयता सार्वजनिकी सार्वभौमिकी च । विश्वभाषायाः विशेषतो भारोयूरोपीयभाषायाः आदर्शस्वरूपनिर्धारणे संस्कृतस्य महनीयत्वं महीयतेतराम् । विश्वभाषापरिवारनिर्माणे संस्कृतस्य योगदानं वर्धाप्यते । ऐतिहासिकव्याकरणस्य भाषाविज्ञानस्य च संस्कृतम् अपरिहार्यम् उपादानम्। संस्कृतस्य विज्ञानसम्मतत्वेन यथा गुरुत्व तथैव वाङ्मयस्य परिव्याप्तौ अपूर्वकोषत्वं च अन्विष्यते अविसंवादेन स्वीक्रियते च। सर्वासु भाषासु संस्कृतम् ईदृशी एका भाषा यत्र कारक-विभक्ति-प्रत्यय-उपसर्ग-विकरणादयः सर्वे एव ईदृशं वैशिष्ट्यं धारयन्ति, यान् विना भाषाया अस्तित्वं नैव सम्भवेत्। उक्तिरियं ग्रीक्-लाटिनादिषु तथा च इन्दो-इयुरोपीयभाषागोष्ठीषु अपि समानरूपेण प्रयोज्या। एवंविधस्य विभक्तिप्रत्यय-बहुल-भाषायाः वाक्ये शब्दस्य अवस्थाने च किमपि निर्दिष्टः नियमः नापेक्षते।

ऐतिहासिकतथ्यानुशीलनेन परिज्ञायते यत् बहुप्राचीनकालादेव भारतवर्षेऽस्मिन् भाषाविज्ञानस्य चर्चा समजनि । एतस्य प्रारम्भो वैदेशिकैः विद्वद्भिर्विहित इति केषाञ्चित् मतमस्ति । ऐतिहासिकानां मतानुसारम् इतो द्विशतवर्षेभ्यः प्राक् पाश्चात्त्यविद्वांसो भाषाविज्ञानस्य कियदंशम् आश्रित्य स्वीयमालोचनमकुर्वन्। यदा तेषां संस्कृतेन सह परिचयो जातस्तदा ते स्व स्व भाषाभिः संस्कृतस्य साम्यमन्वभवत् । संस्कृतं स्वदेशेन परिचितं कारितवत्सु 'सार् युलियम् जोन्स्' प्रमुखो भवति। तत्समयादारभ्य पाश्चात्त्यदेशेषु नूतनदिशा भाषाविज्ञानाध्ययनस्य प्रथमसूत्रपातो जातः । संस्कृतज्ञानं विना भाषा तुलनाध्यवसायो निष्फल इति क्रमशः पाश्चात्त्यविद्वद्भिरनुभूतम् । सांप्रतिककाले प्राकृतं भाषाविज्ञानमपि विज्ञानस्यांशभूमिति निश्चप्रचम् । अतः भाषाविज्ञानस्य विचारेण भाषाणां कारणं नितरां ज्ञायते। यतस्तत्र भाषा कथमागता, कुत आयाता, कस्माज्जाता ? किमियं सहजा ? अपि किमियं जगतः प्रागासीत् अथवा मनुष्यैरनन्तरं निर्मिता ? इदं नित्या वा अनित्या वा ? कथं वा इयं परिवर्त्तनशीला ? कथं नु भाषा विभिन्नेषु देशेषु भिन्न भवति। इति नाना प्रश्ना अस्माकं मनसि जायन्ते । एतस्य प्रश्नकदम्बकस्योत्तरं भाषाविज्ञानशास्त्रे प्रदत्तमस्ति । तस्माद् भाषाविज्ञानेन विना भाषाणां सर्वासां दृश्यमानानां मूलभूतं रहस्यं ज्ञातुं न शक्यते । भाषाविज्ञानानुसारं संस्कृतभाषा अथवा भारतीया आर्यभाषा इन्दो-ईरानीयोपशाखान्तर्गता इन्दो-इउरोपीयभाषापोष्ठ्या अन्तर्भूता भारतीयश्रेण्याम् अन्तर्गता एका भाषा ।[1] अस्मात् एकस्मिन् पक्षे इन्दो-ईरानीयोपशाखया सह अपरस्मिन् पक्षे इन्दो ईरोपीय-भाषागोष्ठ्या च सह सम्पृक्ता इयं संस्कृतभाषा। विश्वस्य काऽपि भाषा कथमपि पृथक्रूपेणाऽवस्थातुं नैव समर्था। अतः सर्वा एव भाषाः नूनम् पूर्ववर्तिनः कस्यापि भाषायाः वंशजाः अथवा कस्याः भाषायाः सम्भूता भवेत्। पुनश्च साऽपि भाषा कुत्रचिदपि एकस्याः भाषायाः प्राचीनरूपात् समुत्पन्ना सति अन्यभाषाभिः सह संयुज्य व्यवहृता स्यात्। अतः संस्कृतं न कथमपि पृथक्भूता भाषा

भवितुम् अर्हति । अस्मात् संस्कृतस्यापि पूर्वजः वंशधरश्चोभौ स्तः । भाषाविज्ञानस्य परिशीलनेन ज्ञायते यत् संस्कृतस्य पूर्वपुरुषोऽस्ति वैदिकः, परोक्षरूपेण इन्दो-इरानीयः ततोऽधिकश्च परोक्षरूपेण इन्दो-ईरोपीयश्च । एवमपि संस्कृतस्य परवर्तिनः भाषाः भवन्ति प्राकृतभाषासमूहाः परवर्त्तिकालस्य नव्यभारतीयार्यभाषास-मूहाश्च यथा ओडिआ-वांला-हिन्दी-मैथिली-पाञ्जावी-राजस्थानी-माराठीप्रभृ-तयः।[2] एताः भाषा भारतस्य पूर्वादारभ्य पश्चिमांशं यावत् प्रचलिताः सन्ति। अस्मता् इन्दो-ईरोपीयभाषैव संस्कृतस्य जननीति वक्तुं शक्यते। क्रमशः संस्कृतभाषेयं भारतवर्षस्य निकटतरजातिषु यथा द्राविड-अष्टिक-सिनो-टिवेटान् प्रभृतिषु अपि प्रसारिताऽभूत्। एतदतिरिच्य भारतवर्षात् बहिः प्रतिवेशदेशेषु अपि संस्कृतभाषा स्वकीयप्रभावविस्तारं कृता। तेषु संस्कृतप्रभावितेषु देशेषु जाभा-सुमात्रा-चीन्-तीव्वत्- वोर्णिओप्रमुखाः अन्यत्तमाः भवन्ति। परन्तु इदानीं संस्कृतभाषा न केवलं भारतवर्षे सीमाबद्धापि तु पृथिव्याः सर्वांशे यथा इन्दो-ईरोपीयभाषासंस्कृति-इतिहास-पौराणिक-कथा-धर्म-भाषासाहित्यादिषु उत्सवरूपेण समुन्नतिं लभते।

संस्कृतभाषायां 'संस्कृतम्' इति शब्दस्य प्रयोगः नाति-प्राचीनः । यद्यपि पाणिनेः प्रागेव 'संस्कृतम्' इत्यस्य प्रयोगः जातः तथापि भाषाऽर्थे संस्कृतस्य प्रयोगः कदापि नाऽभवत् । वैदिकसाहित्येऽपि संस्कृतस्य भाषाऽर्थे व्यवहारः नैव परिलक्ष्यते ।[3] ऋग्वेदे-तैत्तिरीयसंहितायां च चतुर्विधानां भाषाणां समुल्लेखोऽस्ति ।[4] तत्र तु संस्कृतस्य कुत्रापि नास्त्युल्लेखः । शतपथब्राह्मणे बहुविधानां भाषाणां समुल्लेखेऽपि संस्कृतस्य नास्त्येव नामोल्लेखः।[5] अस्मात् ऋग्वेदस्य युगादारभ्य पाणिनिं यावत् संस्कृतशब्दस्य भाषाऽर्थे प्रयोगः न परिलक्ष्यते। ख्रिष्टीये तृतीये शतके भरतस्य नाट्यशास्त्रे संस्कृतस्य भाषाऽर्थे प्रयोगः लक्ष्यते। तत्र भरतः स्वीये नाट्यशास्त्रे प्राकृतेन सह सप्तभाषाणाम् उल्लेखं करोति । तेषु संस्कृतम् एवैकमस्तीति ज्ञायते । ततः परम् अवश्यं संस्कृतस्य भाषार्थे बहुलव्यवहारः सन्दृश्यते । संस्कृतालंकारिकग्रन्थेषु प्राकृतेन सह संस्कृतशब्दस्य भाषार्थे प्रयोगः सन्दृश्यते ।[6] यद्यपि 'संस्कृतम्' इति नाम भाषाऽर्थे साम्प्रतिककाले बहुलरूपेण प्रचलितं तथापि भाषाविज्ञानिनः किन्तु संस्कृतभाषाविज्ञानग्रन्थेषु संस्कृतनाम्नः स्थाने 'आर्यभाषा' इति नाम व्यवहरन्ति । आर्यशब्दोऽयं भाषाऽर्थे आरण्यकादिषु ग्रन्थेषु प्राप्यते। ऐतरेयारण्यके सांख्यायनारण्यके च 'आर्य वाक्' इति नाम्ना आर्यभाषायाः व्यवहारः लक्ष्यते ।[7] आवेस्ता भाषानुसारं आर्यशब्दोऽयं 'अइर्य' (airya) प्राचीनपारसिकभाषायां 'अरियः' (airya) ग्रीक् भाषायां च 'आरिओ' (airo) इति रूपेण प्राप्यते । 'आरियः' शब्दोऽयं ग्रीक्भाषायाम् 'आरिस्तोस्' (aristos) भवति यस्यार्थः भवति 'सद्वंशीयः'। इमं 'सद्वंशीयं' इति शब्दं संस्कृते 'आर्यिष्टः' (aryistha) यस्यार्थः 'उत्तमः' इति शब्देन सह तुलयितुं शक्यते । अस्मात् शब्दादेव परवर्त्तिकाले ईरान् (Iran) आयाल्र्याण्ड (Ireland) प्रभृतीनां देशानां नामकरणं जातम् इत्यपि अनुमीयते । यतो हि अनयोः द्वयोः देशयोः शब्दस्यार्थोऽपि सद्वंशीयः जनः इत्युच्यते ।

भाषातात्त्विकाः अस्मात् 'आर्य' इति नामानुसारं भारतवर्षस्य प्राचीनभाषायाः नामकरणं 'आर्यभाषा' (Aryan language) इति कुर्वन्ति। परवर्त्ती कालेऽपि अस्याः भाषायाऽ समुत्पन्ना संश्लिष्टा वा याः भाषाः समुद्भवाः तासां नामभिः सह सादृश्यं संस्थाप्य अस्याः भाषायाः नाम आर्यभाषा एव विहिता । इयम् आर्यभाषा प्रधानतः त्रिस्तरेषु विभक्ता जाता । तेषु सर्वप्राचीनस्तरस्य नाम प्राचीन-भारतीयार्यभाषा । (Old Indo-Aryan=OIA) ततः द्वितीयस्तरस्य नामासीत् मध्य-भारतीयार्यभाषा । (Middle Indo-Aryan=MIA) ततश्च तृतीयस्तरस्य नाम जाता नव्य-भारतीयार्यभाषा । (New Indo-Aryan=NIA) एकस्याः भाषायाः समुत्पन्नाः संश्लिष्टाः वा भाषाः यथा एकेनैव नाम्ना ज्ञायते, एतदर्थम् अस्याः भाषयाः नाम 'Indo-Aryan language' अर्थात् भारतीया आर्यभाषा इति नामकरणं जातम् । अतः भाषातात्त्विकैः संस्कृतमिदं 'आर्यभाषा' इति नाम्ना समधिकरूपेण व्यवहृतम्।[8]

एवं यद्यपि आर्यभाषायाः स्तरत्रयं ससुपलब्धं तथापि भाषातात्त्विकाः अनया भाषया सह संयुक्ताः भाषाः ज्ञातुं साधारणतः 'आर्यभाषा' इति व्यवहरन्ति । तत्र प्राचीन-भारतीयार्यभाषया वैदिकलौकिकभाषाद्वयोरपि ग्रहणं क्रियते । परन्तु 'संस्कृतम्' इति शब्दप्रयोगेण मुख्यतः लौकिकसंस्कृतमेव बुध्यते। अस्मादुभयोः वैदिकलौकिकसंस्कृतयोः बोधनाय संस्कृतस्य स्थाने आर्यभाषायाः नामग्रहणं जातम् । एवमपि अनुरूपभावेन मध्यभारतीयार्यभाषां बोधयितुं 'प्राकृतम्' इति शब्दस्य व्यवहारः क्रियते। परन्तु प्राकृतेन केवलमात्रं प्राकृतभाषायाः बोधः जायते न तु पालि-अशोकादीनां शिलालेखानाम् अवबोधः इति शङ्कया प्राकृतस्य स्थाने मध्यभारतीयार्यभाषायाः प्रयोगः भवति । अतः अनया मध्यभारतीयार्यभाषया प्राकृत-पालि-शिलालेख-अपभ्रंशादीनामपि अवबोधोऽपि सम्भवति। अनेन 'मध्यभारतीयार्यभाषा' इति नाम भाषातात्वकानां निकटे समधिकरूपेण समादृतम्। एवमपि अनुरूपभावेन नव्यभारतीयार्यभाषाणाम् अपि भाषातात्त्विकानां निकटे अधिका समादृता भवति। यद्यपि वयम् आधुनिकशब्दस्य व्यवहारणे अर्वाचीनभाषासमूहान् एव जानीमः तथापि 'नव्यभरतीयार्यभाषा' इत्यनेन एकैव भाषा बुध्यते । यस्यामन्तर्गताः विविधा उत्तरभारतीय-प्रान्तीयभाषाः यथा- असमीया-वांला-ओडिआ-मैथिली-भोजपुरी-मगधी-सदानीछत्तिशगडी-हिन्दी-माराठी-गुजराती-राजस्थानी-पांजावी-सिन्धी इत्यादयः। इमाः सर्वाः भाषाः एकैव नाम्ना अभिधातुं संस्कृत-प्राकृत-आधुनिकानां त्रयाणां स्थाने भारतीयार्यभाषा इत्यस्य नामग्रहणं भवति।[9]

**संस्कृतभाषायाः वैशिष्ट्यम्**

इतिहासावलोकनेन ज्ञायते यत् भाषाविज्ञानं तु वेद-ब्राह्मण-निरुक्त-शिक्षा-प्रातिशाख्य-व्याकरणादिषु यत्र तत्रोपलभ्यते गवेषकैः । तत्र प्रथममेव वेदादेकमुदाहरणमत्र प्रदीयते। तद्यथा—

**उत त्वः पश्यन् न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।**
**उतो त्व स्मै तन्वं विसस्रे जायेव पत्यं उशती सुवासाः ।।**

अयमर्थोऽस्य मन्त्रस्य-केचित् वाचं श्रुत्वा अर्थं नावगच्छन्ति। अवगम्यमानेष्वपि सर्वेषां सम्यक् प्रतीतिर्नैव जायते। यथा जाया पतिमभिलष्यमाणा सुवस्रा सती तस्मै एव आत्मनः शरीरं प्रदर्शयति, तथैव कस्यचित् (ननु सर्वस्व) भाग्यशालिनो जनस्य समीपे वाक् आत्मानं प्रकाशयति।

भगवान् इन्द्रो देवैरनुरुद्धः शब्दानां प्रकृतिप्रत्ययविभाजनं कृतवान् इति तैत्तिरीयसंहितायां दृश्यते। तथाहि - 'वाग् वै पराच्यव्याकृताऽऽवदत्। ते देवा इन्द्रमब्रुवन् - इमां नो वाचं व्याकुरु इति। सोऽब्रवीद् - 'वरं वृणै, मह्यं चैवैष वायवे च सह गृह्यते इति। तस्मादैन्द्रवायवः सह गृह्यते। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुह्यते इति।

यद्वेवापः प्रणयति अद्भिर्वै इदं सर्वमाप्तं तत्प्रथमेनैवैतत्कर्मणा सर्वमाप्नोति। इत्यत्र आप् धातोः अप्शब्दं व्युत्पाद्य वेदविहितम् अप्प्रणयनम् इत्थं समर्थितं खलु शतपथब्राह्मणग्रन्थे। अङ्गारेष्वङ्गिराः (संबभूव) इति निरुक्तम् अङ्गारशब्दात् 'अङ्गिरः' इति शब्दं व्युत्पाद्य अङ्गादङ्गिरसामुत्पत्तिमवोचत्।

श ष स ह र इत्येत्वां पूर्ववर्ती अनुस्वारः अलावुवीणानिर्घोषेणोच्चार्यते इति पाणिनीयशिक्षायां कथितमस्ति इत्थम् –

**अलावुवीणानिर्घोषो दन्तमूल्यः स्वराननु।**
**अनुस्वारस्तु कर्त्तव्यो नित्यं ह्रोः शषसेषु च॥**

पदान्तस्थस्य स्पर्शवर्णस्य उच्चारणे जिह्वादिकरणं शिथिलीकर्त्तव्यमिति शुक्लयजुः प्रातिशाख्यग्रन्थस्य निर्देशो विद्यते। तथा चोक्तं तद्ग्रन्थे –

**"स्पर्शान्तस्य स्थानकरणविमोक्षः कर्त्तव्यः।"**

सुधी-उपास्यः सुध्युपास्यः। अत्र इकारस्य यकारत्वं विहितं व्याकरणशास्त्रे 'इकोयणचि' इति पाणिनीयसूत्रेण। शिरासिरा (महाष्ट्रीयप्राकृते)। अत्र शस्य स भवति 'शषोः सः' इति सूत्रेण। वैखरीवाचः उत्पत्तिप्रकारः पाणिनीयशिक्षायां कथितमस्ति। तदनुसारेण आत्मना प्रेरितं मनः कायाग्निमाहत्य तद्वारा पवन प्रेरयनं तदभिघातेन वर्णान् जनयतीति। सोऽयं संयोगजः शब्दो वैखरीवाग्रूप इति कथ्यते। तथा चोक्तम् -

**आत्मा बुद्ध्या समेत्यार्थान् मनो युक्ते विवक्षया।**
**मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥**
**सोदीर्णो मूर्ध्यभिहितो वक्त्रमापद्यमारुतः।**
**वर्णान् जनयते इत्यादिः॥**

किं च पाणिनीयशिक्षायामपि भाषाविज्ञानस्याङ्गभूतस्य ध्वनिविज्ञानस्य भेदविषये सूचना लभ्यते। 'अ इ उ ऋ' इत्येते चत्वारः स्वराः ह्रस्व-दीर्घ-प्लुतभेदेन द्वादशरूपतां भजन्ते। लृकारस्तु ह्रस्वत्वेन उपदिश्यते। अत इमे खलु त्रयोदश भवन्ति। 'ए ऐ ओ औ'

इत्येतानि च सन्ध्यक्षराणि भवन्ति। सन्ध्यक्षरेषु एतेषु ह्रस्वो नास्ति। तस्माद् दीर्घ - प्लुतभेदेनाष्टावेतानीति ज्ञातव्यम्। तथा चोक्तं पाणिनीयशिक्षायाम्—

**त्रिषष्टिचतुःषष्टिर्वा वर्णाः शम्भुमते मताः।**
**प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा॥**
**स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।**
**यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥**
**अनुस्वारविसर्गश्च क पौ चापि पराश्रयौ।**
**दुःस्पष्टेश्चापि विज्ञेयो लृकारः प्लुत एव च॥**

तन्त्रशास्त्रोक्तवर्णमातृकायामपि ध्वनिभेदविषये महान् विचारो वरीवर्ति। विशेषतो भाषाविज्ञाने शब्दपरिवर्त्तनविषये ये नियमाः कथिता विद्यन्ते तस्य निरुक्तस्यैव मुख्या भूमिका वरीवर्ति। तदर्थं चत्वारो नियमाः कथिताः। ते सन्ति वर्णागमो, वर्णविपर्ययः, वर्णविकारः, वर्णनाशश्च।

एवमपि संस्कृतसाहित्येतिहासस्यावलोकनेन ज्ञायते यत् तत्रापि संस्कृतशब्दस्य भाषार्थे प्रयोगः वैशिष्ट्यं च परिलक्ष्यते। यद्यपि रामायणस्य कालनिर्णये बहुवादानुवादः संलक्ष्यते, तथापि भाषाऽर्थे रामायणस्य सुन्दरकाण्डे संस्कृतस्य प्रयोगः प्राप्यते। तत्र हनुमान् सीतायाः निकटे कया भाषया वाचं वदिष्यति तस्मिन्नेव प्रसङ्गे संस्कृतभाषाया एव नामोल्लेखः संन्दृश्यते। तद्यथा—

**अहं ह्यतितनुश्चैव वानरश्च विशेषतः।**
**वाचं चोदाहरिष्यामि मानुषीमिव संस्कृताम्॥**
**यदि वाचं वदिष्यामि द्विजातिरवि संस्कृताम्।**
**रावणं मन्यमाना मां सीता भीता भविष्यति॥**[10] इति

अनुरूपभावेन कालिदासोऽपि स्वकीये काव्ये नैकेषु प्रसङ्गेषु संस्कृतप्राकृतभाषयोः उल्लेखं करोति तन्मतानुसारं संस्कृतं नाम संस्कारपूता वाक् प्राकृतं च सुखग्राह्या इति। हरपार्वत्योः विवाहे वाग्देवी भाषाद्वयेनैव वरवधू आशीर्वादं दत्तवती। तद्यथा—

**द्विधा प्रयुक्तेन च वाङ्मयेन सरस्वती तं मिथुनं नुनाव।**
**संस्कारपूतने वरं वरेण्यं वधुं सुखग्राह्यनिबन्धनेन॥**[11] इति
**संस्कारवत्येव गिरा मनीषि तया स पूतश्च विभूषितश्च**[12] इति

पुनश्च शतकत्रयकारेण भर्तृहरिणाऽपि तदीये नीतिशतके संस्कृतभाषाप्रसङ्गे उक्तम्—

**वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते।**[13] इति

अपि च रघुवंशे कालिदासः संस्कृतस्य महत्त्वमभिलक्ष्योक्तं यत् यदि यथार्थरूपेण

स्वरसंयोगेन च संस्कृतभाषायाः समुच्चारणं सम्भवेत् तर्हि अवश्यमेव यथार्थफलमपि लभेत। तद्यथा–

**पुराणस्य कवेस्तस्य वर्णस्थानसमीरिता।**

**बभूव कृतसंस्कारा चरितार्थैव भारती।।**[14] इति।

अर्थात् पुराणपुरुषस्य वाणी यदि स्थानप्रयत्नानुसारं समुचितरीत्या समुच्चारिता स्यात् तर्हि सा वाणी नूनमेव फलप्रदायिनी भवेत्। अत्र तु कालिदासः संस्कृतभाषार्थे 'भारती' इति शब्दं व्यवहरति । ततः ख्रीष्टीये चतुर्दशशतके मल्लिनाथोऽपि भारतीशब्दं कालिदासानुरूपं व्यवहरति। तद्यथा–

**भारती कालिदासस्य दुर्व्याख्या विषमूर्च्छिता।**

**एषा सञ्जीवनी टीका तामद्योज्जीवयिष्यति।।** [15] इति।

यत् भवतु नाम संस्कृतम् अथवा आर्यभाषा बहुकालादेव भारतवर्षे प्रचलिता अस्ति । यद्यपि मध्यभारतीयार्यभाषासमूहः क्रमशः साहित्ये पल्लविता भूत्वा संस्कृतस्य सन्निकटे अवस्थिताः तथापि मन्यते यत् दशमशताब्द्याः संस्कृतप्राकृताध्ययनयोर्मध्ये प्राकृतभाषा एव समधिकप्रचलिता जाता।

ख्रिष्टीये नवमे शतके राजशेखरः स्वकर्पूरमञ्जर्य्यां संस्कृतप्रसङ्गे भणितम्–

**परुसा सक्कयवन्धा पाऊअ-वन्धोवि होइ मुउमारो।**

**पुरिस-महिलानं जेत्तियं इहस्तरं तेत्तिअं इमाणं।।**[16] इति

अस्यार्थः संस्कृतभाषा स्यात् कर्कशा परन्तु प्राकृतभाषायां विरचिता कविता अतीव सुकोमला । स्त्रीपुरुषयोर्मध्ये यादृशमेव पार्थक्यं अनयोः भाषाद्वयोर्मध्येऽपि तादृशं पार्थक्यं लक्ष्यते । एवमपि पञ्चमशताब्द्याम् आविर्भूतः विद्यापतिः तस्य कीर्त्तिलतायां तदानीन्तनकथ्यभाषायां अवहट्टेकाव्यरचनाप्रसङ्गे कथयति–

**सक्कय-वाणी वुह-अन भावइ,**

**पाउय-रस को मम्म न पावइ।**

**देसील-वअना सव-जन-मिट्ठा,**

**तँ तइसन जम्पञो अवहट्ठो।।**[17] इति

अर्थात् विज्ञजना एव संस्कृतभाषां व्यवहरन्ति । प्राकृतकाव्यस्य रसं न कोऽपि आस्वादयितुं क्षमः। मातृभूमिः सर्वेषां प्रिया तस्मादहं अवहट्ठभाषया एव काव्यं रचयामि। एवं बहुशो ऋषिभिः कविभिश्च संस्कृतप्राकृतयोः महत्त्वं बहुशो प्रतिपादितम्।

**मध्यभारतीयार्यभाषापरिचयः**

भाषायाः गतिस्थितिविषयेऽनुध्यानेनेदं ज्ञायते यत्-भाषाप्रवाहो नदीप्रवाहेण कियदंशेनैव समानो न तु सर्वांशेन। तथाहि-यथा खलु जलपूर्णायाः नद्याः गतिः कदाचिदपि

पश्चान्मुखी न जायते। परन्तु भाषायाः गतिः वर्णमालागतवर्णक्रमदृष्ट्या कदाचिदग्रमुखी यथा गत-गद, सौरसेनी प्राकृते कदाचिच्च पश्चान्मुखी यथा - राजा-राचा, पैशाची प्राकृते। क्वचिद् बृद्धयभिमुखी यथा - द्वितीयः विश्यजेन्द् भाषया इत्यत्र वर्णां शबृद्धाथः, क्वचिच्च क्षयाभिमुखी यथा जगत् - जग इति हिन्द्याम्। अनया आलोचनया सिद्ध्येतत् जातं यत् -भाषाप्रवाहस्य गतिः चक्रवद्भवति। अपि च भाषाप्रवाहस्य गतिस्थितिः सर्वथा समुद्रस्य गतिस्थितिभ्यां सह तुलनामर्हतः। समुद्रस्य जलानामिव प्रतिक्षणं विविधस्थानेषु भाषाङ्गभूतानां वर्णानामग्रमुखी पश्चान्मुखी च गतिरव्याहते स्तः। यदि कश्चिद्वैज्ञानिकः कस्माच्चिदाकलनात् समुद्रस्य स्थितिविषये ज्ञातुं प्रभवेत्तदा समुद्रस्य साम्प्रतिक्या स्थित्या सन्तुल्य उपलभ्यते-'कुत्रचित् समुद्रः कियद्दूरमायातः। कुत्रचित् अन्यत्र वा यथावश्यं स्थिति विद्यते। अग्रगमने पश्चाद्गमने च नानास्थानेषु मात्राभेदो वर्त्तते। इत्थं खलु प्रतिसमयं जायमानया विविधगत्या समुद्रो भिन्नां स्थितिं धारयति। तथैव भाषाऽपि विकासह्रासाभ्यां विविधां स्थितिं संश्रयते।

प्राकृतभाषैव बहुषु क्षेत्रेषु मध्यभारतीयार्यभाषारूपेण (Indo-European) प्रचलिताऽस्ति। एषा भाषा ख्रिष्टीयषष्ठपञ्चमशताब्दीतः ख्रिष्टियनवमशताब्दीं यावत् व्यवहृता जाता। यस्याः समुल्लेखः अशोकानुशासने प्राकृते, पाल्यां, नियाप्राकृते, अपभ्रंशे च बहुशो दृश्यते। यद्यपि भाषेयं पूर्वोक्तं किमपि निर्दिष्टं कालं यावत् भाषामाध्यमः जातः तथापि संकीर्णे अर्थे प्राकृतशब्दोऽयं साहित्यिकं साधारणप्राकृतं बोधयितुं व्यवह्रियते। यद् भवतु नाम मध्यभारतीयार्यभाषायाः मुख्योपभाषारूपेण प्राकृतभाषैव सुविदिता जाता।[18] सोऽयं प्राकृतशब्दः आदौ द्विधा व्याख्याता भाषातात्त्विकैः। वस्तुतः द्विविधेयं व्याख्या 'प्रकृतिः' इति शब्दस्य अर्थद्वयमनुसरति। प्रकृतिशब्दस्य प्रथमोऽर्थः धातुः मूलं वा। भारतीयार्यभाषायाः क्षेत्रे मूलमुपादानमवश्यमेवासीत् वैदिकभाषा। यां भाषां बहुष्वर्थेषु संस्कृतित्युच्यते। अस्मात् संस्कृतादेव यस्याः भाषायाः समुत्पत्तिः स एव प्राकृतः। सुविख्यात-प्राकृत-वैयाकरण-हेमचन्द्रस्य भाषायां 'प्रकृतिः संस्कृतम्-तत्र भवम् , तत आगतं वा प्राकृतम्'[19] इति। 'मार्कण्डेयस्य प्राकृतसर्वस्वेऽपि हेमचन्द्रस्य अनुरूपोक्तिरेव प्रतिफलितेति लक्ष्यते। तद्यथा-प्रकृतिः संस्कृतं तत्र भवं प्राकृतमुच्यते इति। विषयेऽस्मिन् परेशचन्द्रमजुमदारेणोक्तं यत् -प्राकृतस्येयं संज्ञा व्याकरणसम्मतेऽपि नैव ऐतिहासिकसम्मता। अवश्यं 'संस्कृतम्' इति कथनेन यद्यपि बहुष्वर्थेषु कथ्यसंस्कृतस्य विविधाः उपभाषाः बोध्यन्ते तर्हि प्राकृतभाषा संस्कृतजाता इति कथ्यते। परन्तु पाणिनि-पतञ्जलिनिर्धारित-ध्रुपदी-संस्कृतेन प्राकृतशब्दावल्याः व्युत्पत्तिः समप्रभावेण व्याख्या क्रियते। एवमेव शौरसेनी-प्राकृतमेव संस्कृतस्य सन्तान इति वक्तुं शक्यते नान्यः।[20] अस्मात् जन्मगतोत्सस्य मानदण्डानुसारं हेमचन्द्रस्य मार्कण्डेयस्य वा व्याख्या नैव स्यादग्राह्यम्। अस्यैव प्राकृतस्य पञ्चैव प्रधानशाखाः सन्ति तद्यथा-महाराष्ट्री, शैरसेनी, मागधी, अर्धमागधी, पैशाची चेति। प्राकृतशब्दस्य द्वितीया व्याख्या 'प्रकृतिः' अर्थात् प्रजा साधारणजनता वा इत्यनुसारं क्रियते। अस्यैव प्राकृतशब्दस्य तात्पर्यं डॉ.सुकुमारसेनस्य भाषायां यथा-प्राकृतम् इत्यनेन प्रकृतेः

अर्थात् जनता व्यवहृता भाषा इत्युच्यते।[21] एवञ्च डॉ. रामेश्वर श-मेहोदयानां मतानुसारं - 'वैदिकसंस्कृतात् परं क्लासिकाल् संस्कृतं यदा जनसाधारणात् विच्युतः सन् मुष्टिमेयशिक्षितजनानां भाषा आसीत् तदानीन्तनकाले एव जनसाधारणानां मुख्यभाषारूपेण प्राकृतभाषायाः समुत्पत्तिः जाता। Winternits मतानुसारं प्राकृतभाषा जनानां साधारणभाषा आसीत्[22] (Common Language of the People) अनन्तरं तेनापि उक्तं एतदेव स्मर्त्तव्यं यत् आदौ जनानां मुखभाषारूपेण विदिताऽपि परवर्ती काले प्राकृतभाषायाः द्वितीये स्तरे अस्याः भाषायाः यद्रूपं साहित्ये व्यहृतं तद्रूपं तु नासीत् जनसाधारणभाषा। सा आसीत् तु साधारणतया क्लासिकाल् संस्कृतस्येव कृत्रिमा भाषा । अस्मात् यथार्थेणैता भाषां साहित्यिकप्राकृतमित्युच्यते । भाषातात्त्विकाः प्राकृतस्यास्य सोपानत्रयं स्वीकुर्वन्ति । तेषु आदिसोपानम् अर्थात् कथ्यप्राकृतसोपानम् । सोपानस्यास्य निदर्शनं अशोकानुशासनस्य भाषायां तथा च तत्कालीनक्षुद्रप्रत्नलेखेषु विरलरूपेणानुभूयते । ततः द्वितीयं सोपानं तु साहित्यिकप्राकृतश्च। ततश्च तृतीयं सोपानं भवति अपभ्रंशश्च।

मध्यभारतीयार्यभाषायाः व्याप्तिकालोऽस्ति प्रायः पञ्चदशसहस्रवर्षाणि। समयदृष्ट्या एषः कालस्तु नातिस्वल्पोऽस्ति । सुदीर्घकालेऽस्मिन् काऽपि भाषा एकरूपतया नैव स्थातुं समर्था । एवं मध्यभारतीयार्याभाषाऽपि न तिष्ठति । तस्या अपि परिवर्त्तनं सम्भवति । एतदतिरिच्य भारतीयार्याणां विविधाः गोष्ठ्यः विभिन्नेषु स्थानेषु अवस्थानेन आर्यभाषिणः भौगलिकप्रभावं परित्यक्तुं नैव समर्थाः भवन्ति । अस्मात् प्राकृतभाषायाः शाखायाः एकाधिकोपशाखाः आविर्भूताः आञ्चलिकस्वातन्त्र्यात् । मध्यभारतीयार्यभाषायुगेऽस्मिन् यद्यपि प्राकृतभाषायाः महत्त्वपूर्णभूमिका अनस्वीकार्या, तथापि एतदप्यनस्वीकार्यं यत् अस्मिन् युगे एव कालजयीग्रन्थाणां रचना जायते चिरायतसंस्कृतेन । एतदतिरिच्य पालिभाषायाः अपभ्रंशभाषायाश्च प्राकृतोपभाषायाः कस्यापि कस्यापि रूपस्य परिवर्त्तनेऽपि सर्वासामेव प्राकृतलोचनेन संस्कृतप्राकृतयोर्मध्ये सादृश्यं वैसादृश्यं च लक्षणीयं स्यात्।23

**मध्यभारतीयार्यभाषावैशिष्ट्यम् - (ध्वनितत्त्वगतं रूपतत्त्वगतं च)**

पूर्वमालोचितमस्माभिः यत् मध्यभारतीयार्यभाषायाः मुख्या उपभाषाऽस्ति प्राकृतभाषाय। इदानीं ध्वनितत्त्वगतदृष्ट्या रूपतत्त्वगतदृष्ट्या च प्राकृतभाषायाः वैशिष्ट्यानि लक्ष्यणीयानि । तद्यथा-प्राकृते 'ऋ' 'लृ' च नास्ति एव परन्तु संस्कृते 'क्ल्युप्'-धातुजातपदस्य तथा च लाकृति (लृ+आकृतिः) भिन्नलृकारस्य व्यवहारः अन्यत्रैव दुर्लक्ष्यः। संस्कृते 'ऋ'कारः कुत्रापि अः, इः, उश्च स्यात्। तथा मृगः > मग, ऋषि > इसि, बृद्ध > वुड्ढ च भवेत्। एवमपि संस्कृते कुत्रापि ऋकारः रकारः कुत्रापि 'रि' कुत्रापि च 'रु' भवति यथा - वृक्ष > व्रच्छ, मृग > म्रिग, ऋषि > रिसि, मृग > म्रुग चेति। पुनश्च संस्कृत ऐकारः औकारश्च ओकारे परिणमति यथा - तैल > तेल, शैल > शेल, मौत्तिकः > मोत्तिअ, औषधानि > ओषधानि चेत्यादयः। एवञ्च संस्कृते अयः = ए, अवश्च = ओभवति तद्यथा पूजेति, पूजेदि, पूजेइ चेति। भवति > भोदि, होति, होइ चेत्यादयः। संस्कृते पदान्तमकारस्य 'म्' पूर्ववर्त्तीनः

संयुक्तव्यञ्जनवर्णस्य च पूर्ववर्त्तीदीर्घस्वरः ह्रस्वस्वरे परिणमति यथा-कान्ताम् > कान्तं, दीर्घ > दिग्ध चेति। संस्कृते अकारविसर्गौ द्वावेव संयुज्य कुत्रापि अकारः एकारः ओकारश्च भवतः यथा जनः > जन, जने, जनो चेति । एवं च पदान्तस्थ-अकारभिन्न-अन्त्यस्वरवर्णात् परं विसर्गः लुप्तः भवेत्। यथा - पुत्राः > पुत्ता इति। संस्कृते पदान्तस्थितोऽनुस्वारः प्रायशः रक्षितः परन्तु पदान्तभिन्नव्यञ्जनध्वनिः लुप्तः भवेत्। यथा भगवान् > भगवा, नरात् > नरा किन्तु देवं > देवम्, नरम् > नरं च भवति । शः षः सश्च त्रयः शिष् ध्वनिः कुत्रापि प्राकृते न रक्षितः कस्मिन्नपि प्राकृते केवलमेव 'श' इत्यस्मिन् स्थाने 'सकारः' भवति परन्तु प्राकृते 'ष' कारस्यापि कदाचित् लक्ष्यं भवति। मूर्धन्यीभवनमेव प्राकृतस्यान्यत्तमं वैशिष्ट्यम्। ऋकारात् रकारात् 'ष' कारात् च परं दन्त्यवर्णं मूर्धन्यवर्णे परिणमति यथा - कृत > कट, बृद्ध > वुड्ढ इत्यादिः । समीभवनमपि प्राकृतस्यान्यत्तमं वैशिष्ट्यम् । विषमध्वनिद्वयस्य समध्वनौ परिणमनमेव समीभवनम्। यथा - भक्त > भत्त इति। अत्र तकारस्य प्रभावादेव ककारोऽपि तकारेण परिणमति। प्राकृते क्षकारः (क्+ष) कुत्रापि क्ख, कुत्रापि च च्छरूपेण परिणमति यथा - वृक्ष > वृक्ख, वृच्छ चेति। प्राकृते स्वरवर्णद्वयस्य मध्यवर्त्ती अल्पप्राणवर्णस्य लोपः तथा च कुत्रापि कुत्रापि 'य' रूपेण श्रुतिः भवति यथा - सकल > सत्मल > सयल च। पुनश्च स्वरवर्णद्वयस्य मध्यवर्त्ती महाप्राणवर्णः 'ह' कारेण परिणमति यथा- मुख > मुह इति। एवमपि आदिस्थसंयुक्तव्यञ्जनवर्णद्वयस्य कुत्रापि एकस्मिन् व्यञ्जनध्वनौ लोपः कुत्रापि वा व्यञ्जनद्वये स्वरविभक्तेः प्रयोगः भवति। लोपस्य क्षेत्रे यथा - त्रीणि > तिन्नि। स्वरभक्तेः स्थानं यथा - द्वादश > दुवादस[24] इत्यादयः।

रूपतात्त्विकदृष्ट्या अपि मध्यभारतीयार्यस्य (व्यापके अर्थे प्राकृतस्य) लक्षणीय-वैशिष्ट्येषु अन्यत्तमः द्विवचनस्याभावः । शब्दरूपे धातुरूपे च प्राकृतभाषायाः किमपि द्विवचनस्य पदं नास्ति। तत्र बहुवचनस्य पदप्रयोगेणैव द्विवचनं प्राकृतभाषायां बुध्यते यथा संस्कृते द्वौ मयूरौ प्राकृते द्वो मोरा इति । प्राचीनभारतीयार्यभाषायाः अन्त्यस्वरभेदेन शब्दरूपस्य पार्थक्यं सुविदितमेव। यथा नर-मुनि-सखि-पति-साधु-पितृ प्रभृतीनां शब्दानां प्रत्येकेषां यथैव पृथक्रूपमस्ति न तथा प्राकृते । प्राकृते तु 'आकारान्त'-'इकारान्त'-'उ'कारान्तान् विना समस्तस्वरान्तशब्दा एव नरशब्दानुरूपम् । एवमपि 'इ'कारान्त मुनिशब्दस्य षष्ठीएकवचने 'नरस्स' (नरस्य) इत्यस्येव 'मुनिस्य' पदं लक्ष्यते । अत्र तु सिद्धान्तरूपेणैवं वक्तुं शक्यते यत् इकारान्तस्य उकारान्तस्य च पुंलिङ्गक्लीवलिङ्गशब्दस्योपरि अकारान्तशब्दस्य प्रभावः नैव दुर्लक्ष्यम् । विनाऽनुस्वारं व्यञ्जनान्तभिन्नशब्दस्य अन्त्यव्यञ्जनस्य लोपेन शब्दाः स्वरान्तशब्देषु परिणताः भवन्ति यथा - 'कर्मन्' इति शब्दस्य चतुर्थी एकवचने कर्मणे किन्तु प्राकृते कर्माय इति शब्दः संस्कृते 'नराय' इत्यनेन सह तुलनीयः । प्राचीनभारतीयार्यभाषया (संस्कृतेन) सह शब्दरूपस्य क्षेत्रेऽपि मध्यभारतीयार्यभाषायाः (प्राकृतस्य) किञ्चिदुल्लेखयोग्यं पार्थक्यं यथा - 'संस्कृतेअकारान्तशब्दस्य प्रथमाद्वितीयाबहुवचनस्य रूपं यथाक्रमेण 'नराः' 'नरान्' चेति। परन्तु प्राकृते द्वयोः स्थलयोः

रूपमेकं 'नरा' इति। तृतीयाबहुवचेन संस्कृतस्य 'भिः' (भिस्) विभक्तिः प्राकृते 'हि' पञ्चम्याः 'भ्यस्' (भ्यः) स्थानेऽपि कुत्रचित् लक्ष्यते यथा - 'संस्कृतस्य 'आजीवितेभ्यः' प्राकृते 'जीवितेहि' पुनश्च संस्कृते विशेष्यसर्वनामशब्दयोः पृथग्रुपमस्ति । प्राकृते तु सर्वनाम्नः विभक्तिः प्रायशः विशेषस्य क्षेत्रेऽपि व्यवहृता जाता। यथा - 'विजितम्' हि देहि' इति वस्तुतः संस्कृते सप्तम्याः एकवचने 'स्मिन्' 'प्राकृते म् हि' । अस्मात् विजिते > विजितेऽस्मिन् > विजितम्हि (प्राकृतम्) इति । एवमपि प्राचीनभारतीयार्ये संस्कृते भ्वादि-अदादि-तनादि-दिवादिभिः भेदैः धातूनां उदशगणाः सन्ति। प्रतिगणेषु धातुरूपाण्यपि पृथक् सन्ति। किन्तु मध्यभारतीयार्ये (प्राकृते) सर्वे धातवः भ्वादिधातुरूपं लभन्ते । एतत् बिना प्राकृते परस्मैपदात्मनेपदभेदेन धातुविभागः नास्ति। अत्र तु प्राकृते सर्वे धातवः परस्मैपदीनः सन्ति। प्राचीनभारतीयार्ये (वैदिके) क्रियायाः भावाः पञ्च सन्ति यथा - निर्देशकः, अनुज्ञा, अभिप्रायः, निर्बन्धः स्वाभाविकश्चेति । मध्यभारतीयार्ये (प्राकृते) तु निर्बन्धः अभिप्रायभावश्च सम्पूर्णलुप्तोऽस्ति । एवमपि प्राचीनभारतीयार्ये पञ्चकालः अस्ति तद्यथा वर्त्तमानः (लट्) अस्मपन्नातीतः (लङ्) अनद्यतनातीतः (लुङ्) सम्पन्नातीतः (लिट्) भविष्यतः (लृट्) चेति । प्राकृते तु मध्यभारतीयार्ये सम्पन्नतीतलिट् इति कालः नास्त्यैव । पुनश्च असम्पन्नातीतः लङ् अनद्यतनः लुङ् च एकत्रीभूय एकस्मिन्नेव अतीते काले परिणमतः । एवमपि त्वा-त्वायप्रभृतीनां प्रत्यययोगेन प्राचीनभारतीयार्यभाषायां (वैदिके) नैकाः असमापिकाक्रियाः सम्भवन्ति । परन्तु असमापिकाक्रियारूपस्य वैचित्र्यं मध्यभारतीयार्यभाषायां (प्राकृते) अनेकांशेषु लुप्तं भवति। पुनश्च निष्ठाप्रत्यययोगेन (क्त, क्तवतु) चिरायतसंस्कृते समापिकाऽतीतकालस्य यत् क्रियारूपं जातं सेयं धारा मध्यभारतीयार्ये बहुशः अनुसृता। छन्दसः क्षेत्रेऽपि प्राचीनभारतीयार्यभाषायाः अन्त्यानुस्वारः नासीत्। परन्तु मध्यभारतीयार्यभाषायाः शेषपर्वणि कवितायाः पंक्तिद्वयोर्मध्ये अन्त्यानुप्रासः दृश्यते । प्राचीनभारतीयार्यभाषायाः छन्दः प्रधानतः अक्षरमूलकः आसीत् । परन्तु मध्यभारतीयार्ये तदासीत् मात्राप्रधानम्। अर्थात् छन्दः अक्षराणां संख्यानामुपरि निर्भरशीलं न भूत्वा अक्षरोच्चारणस्य कालपरिमापकमात्रायाः उपरि निर्भरशीलम् आसीत् । प्राचीनभारतीयार्यभाषायां (वैदिके संस्कृते च) प्रतिकारकाणां विभक्तिः निर्दिष्टा आसीत्। अस्मात् वाक्ये पदविन्यास्य किमपि सुनिर्दिष्टः नियमः नासीत् । तत्र विभक्तिं दृष्ट्वा एव कर्तृकर्मणोः ज्ञानं जायते। परन्तु मध्यभारतीयार्यभाषायाः क्षेत्रे विभक्तिचिह्नं विलुप्तम्। यस्य फलस्वरूपं पदानां कारकबोधः कष्टसाध्यः जातः । अस्मात् वाक्ये पदस्य निर्दिष्टावस्थानस्योपरि पदपरिचयः निर्भरशीलोऽभवत्। अतः अस्यां भाषायां पदविन्यासस्य अवस्थानोपरि विशेषगुरुत्वमासीत्। केषुचित् पदेषु विभक्तिचिह्नलोपेन तस्याः विभक्तेः अर्थे कस्यापि स्वतन्त्रशब्दस्य अनुसर्गस्य च व्यवहारः आसीत्।[25]

**निष्कर्षः**

इत्थं सूक्ष्मेक्षिकतया चिन्तनेन ज्ञायते यत् संस्कृतं मध्यभारतीयार्यभाषायां च प्रति

यद्यपि पाश्चात्त्यानां विपश्चितां सुमहदवदानं विद्यते तथापि भाषाविज्ञानान्तर्भूतेषु निरुक्त-शिक्षा-व्याकरण-षडङ्गानां वेदानां त्रिषु एवाङ्गेषु बाहुल्याद् विषयेऽस्मिन् चर्चितत्वात् यास्क-याज्ञवल्क्य-पाणिनिप्रभृतीनां भारतीयमनीषिणां भाषाविज्ञानीनामियमादिकथनरूपेण सर्वैरपि साम्प्रतिकविद्वद्भिरङ्गीकृतत्वात् विज्ञानमिदं भारतीयमनीष्युपज्ञम्। तर्हि संस्कृतं देवभाषा सा च केवलमेव काव्यादीनां भाषा इत्येवं न समीचीनम्। एवमपि प्राकृतं तावत् सर्वसाधारणभाषा एवमपि न युक्तियुक्तम्। संस्कृतं प्राकृतश्चोभौ एव एकदा भारतवर्षेऽस्मिन् कथ्यभाषारूपेण प्रचलिते आस्ताम्। संस्कृतनाट्याहित्यं विषयेऽस्मिन् महत् प्रमाणम्। यथा राजाविदूषकयोः कथोपकथनं स्मरणीयम्। राज्ञः विशुद्धं संस्कृतं विदूषकं निकषा नावोध्यं तथा च नावोध्यं राजानं निकषा विदूषकस्य प्राकृतभाषा। धर्मदर्शनयोः पवित्रा देवभाषा संस्कृतमेव भारतीयसंस्कृतेः वाहकम्। अभिजातभाषा-संस्कृतमेव निःसन्देहेन राजसभायाः साहित्यिकभाषा। तर्हि एषा तु नासीत् चिरकालस्य कृत्रिमा भाषा। प्रचलित-कथ्यभाषारूपणेणाऽपि एकदा संस्कृतं सुशोभितं जातम्। श्रूयते च-अद्यापि जनाः कुत्रापि संस्कृतमेव मातृभाषारूपेण व्यवहरन्ति इति अलं पल्लवितेन।

**पादटीका**

1. संस्कृतभाषातत्त्व, पृ. 1
2. संस्कृतभाषातत्त्व, पृ. 1
3. संस्कृतभाषातत्त्व, पृ. 2
4. संस्कृतभाषातत्त्व, पृ. 3
5. संस्कृतभाषातत्त्व, पृ. 3
6. संस्कृतभाषातत्त्व, पृ. 3
7. संस्कृतभाषातत्त्व, पृ. 3
8. संस्कृतभाषातत्त्व, पृ. 4
9. संस्कृतभाषातत्त्व, पृ. 4
10. रामायणम्, 5.30.17-18
11. कुमारसम्भवम्, 7.90
12. कुमारसम्भवम्, 1, पृ. 45
13. नीतिशतकम् 19, पृ. 19
14. रघुवंशम् 10.36
15. मल्लिनाथ सञ्जीवनी टीका (कुमारसम्भवम्), पृ. 5
16. कर्पूरमञ्जरी, 1.4
17. संस्कृत भाषातत्त्व, पृ. 6
18. संस्कृतसप्तकम्, पृ. 238
19. संस्कृतसप्तकम्, पृ. 238
20. संस्कृत ओ प्राकृतभाषार क्रमविकाश, पृ. 238

21. भाषार इतिवृत्त, पृ. 111
22. साधारणभाषाविज्ञान ओ वांला भाषा, पृ. 559
23. भाषातत्त्व, पृ. 241
24. भाषातत्त्व, पृ. 241
25. भाषातत्त्व, पृ. 242

**सन्दर्भग्रन्थ सूची**


1. कर्पूरमञ्जरी-राजशेखर-चौखम्बाप्रकाशनम् , वाराणसी
2. कुमारसम्भवम् - कालिदासः डॉ. शिवशङ्करसरकार-राजाराममोहनसरणी, कोलकाता
3. नीतिशतकम् - भर्तृहरि- पं. गोपीनाथ-राष्ट्रियसंस्कृतसंस्थानम् , नइदिल्ली
4. भाषाविज्ञान रत्ना वसु- संस्कृतपुस्तकभाण्डार, कालिकाता-6
5. भाषातत्त्व-ड. प्रद्योत वन्द्योपाध्याय, संस्कृतपुस्तकभाण्डार, कलिकाता
6. भाषार इतिवृत्त-अध्यापक श्यामपद चक्रवर्ती संस्कृतबुक्डिपो विधानसरणी, कलकाता
7. रघुवंशम्- कालिदास ड. जनेशरञ्जन भट्टाचार्य-वि.एन् पब्लिशर्स, कोलकाता
8. व्रजमाधुरी- डॉ. व्रजकिशोरनायक-श्रीपर्णा प्रकाशनी-पुरा-1, ओडिशा
9. रामायणम् - वाल्मीकि-माधवचन्द्ररथ-डाभ् पब्लिशिंग हाउस-मेदिनीपुर, पश्चिमवङ्गः
10. साधारण भाषाविज्ञान ओ वांला भाषा-सत्यनारायण आचार्य कोलकाता पुस्तकभाण्डार, कोलकाता
11. संस्कृतसप्तकम् - ड.प्रद्योतकुमार वन्द्योपाध्याय-ढाका-स्टुण्डेटस् लाइब्रेरी, कलकाता
    संस्कृत भाषातत्त्व-श्रीसत्यरञ्जनवन्द्योपाध्याय-संस्कृत पुस्तक भाण्डार-कलकाता

**UGC - CARE Listed**

**पाणिनीया**
Vol. XXX, Year IX

# सामर्थ्यतत्त्वविमर्शः

**डॉ. अरविन्दमहापात्रः***

तत्र लौकिकसामर्थ्यं द्विविधमस्वतन्त्रपरतन्त्रश्चेति । केचन अपरसहायतामन-पेक्ष्यस्वसामर्थ्यविशेषेण साफल्यं प्राप्नुवन्ति, ते स्वरवत् सर्वत्र राजन्ते। यथोक्तम् -

**एकाकिनोऽपि राजन्ते सत्त्वसाराः स्वरा इव।**

**व्यञ्जनानीव निःसत्त्वाः पपरेषामनुयायिनः ।।**[1] इति।

समर्थानामेव दृश्यते वहुत्र सहयोगः सम्मेलनं वा, ये हि निःसत्त्वाः-असमर्थास्तेषां परस्परं पार्थक्यमेव दृष्टिमुकुरे प्रतिबिम्बिते । समर्थाः कृतधियः शिक्षितमतयो भवन्ति । ते प्रायेणानायासेनैव कार्यसाधने भवन्ति कुशलाः न भवन्ति ते त्वरिताः कदाचित्। स्थिरबुद्धय उत्साहवन्तस्ते कार्येषु प्रवृत्ताः श्रमं न विदन्ति । भगवन्तं श्रीकृष्णं प्रति सयुक्तिकं स्वीयं मतविशेषं प्रकाशयन्, परिपालयंश्च भगवतः प्रस्तावविशेषमुद्धवो बुद्धिवैभवं प्रदर्शयन् किञ्चिद् ब्रूते –

**सोपधानां धियं धीराः स्थेयसीं खटव्यन्ति ये,**

**तत्रानिशं निषण्णास्ते जानते जातु न श्रमम्।**

**आरभन्तेऽल्पमेवाज्ञा कामं व्यग्रा भवन्ति च।**

**महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ।।**[2]

महर्षिपाणिनिना गुणवृद्धीत्यादिविधयः स्वतन्त्रा अपि निर्दिष्टाः, यत्रैकस्यैव स्वरस्य निर्दिष्टं कार्यमुपपद्यते। मन्ये तेन तेषां किञ्चित् स्वतन्त्रम् (विशिष्टं सामर्थ्यं) द्योत्यत इति। एकः पूर्वपरयोः[3] सूत्रस्याधिकारे तु निर्दिष्टाः गुणवृद्ध्यादिविधयः न तथा सामर्थ्यं द्योतयन्ति, उभयोः स्वरयोः स्थाने तेषां प्रत्येकं प्रवर्त्तमानत्वात्, तथा हि - पूर्वपरयोः स्थाने गुणादिविधि[4] निर्देशात्

---

*प्रभातकुमारमहाविद्यालयः, काँथि, पूर्वमेदिनीपुरम् , पश्चिमबङ्गः

तेषां परतन्त्रं सामर्थ्यं प्रतीयते । ये हि उत्कर्षविशेषाभावात् स्वतन्त्ररूपेण कार्यानुष्ठाने तत्सफलताधिगमे च न समर्था भवन्ति। ते समर्थान्तराणां साहाय्येनावश्यकं विशिष्टं किञ्चित् सामर्थ्यमवाप्य कृतिनो भवन्ति।

लोकेऽपीयं प्रवृत्तिः परिलक्ष्यते, यत् केचित् कदाचित् कस्यचिद्विषयस्य संक्षेपेण, विस्तरेण प्रतिपादनं निर्वचनं वा कुर्वन्ति। इयं संक्षेपविस्तरप्रवृत्तिर्न केवलं साधारणानामपितु विदुषाम्। उच्यते–

**विस्तीर्य हि महज्ज्ञानमृषिः सङ्क्षिप्य चाब्रवीत्।**

**इष्टं हि विदुषां लोके समासव्यासधारणम्।।**[5]

प्रायेण लोकवच्छास्त्रेऽपि व्यवहारस्य सत्त्वात् तत्रापि समासव्यासयोः-संक्षेपविस्तरयोः प्रयोगस्तत्साधुत्वस्यान्वाख्यां चापि क्रियते। सा च समासव्यासयोर्व्यवस्था सामर्थ्यमन्तरा समीचीना स्यादीत्यन्त्र शास्त्रीयसामर्थ्यविचारः प्रस्तूयते।

**शास्त्रीयसामर्थ्यम् –** इति अन्यत्र समासादिविधिषु प्रयुक्तपदानां सामर्थ्यमपेक्ष्यन्ते। व्याकरणे सामर्थ्यं द्विविधम् । 1. एकार्थीभावः, 2. व्यपेक्षा च । अनयोः सामर्थमयोः समासविधानं, विभक्तयादिविधानमिति पृथक्प्रयोजनम्। विधानञ्च केनचित् परिभाषावचनेन अधिकारवचनेन स्यादिति विषये वर्तते महाभाष्यकारद्याचार्याणां विचारः। यदि एकार्थीभावः सामर्थ्यमधिकारश्च निर्दिश्यते तर्हि समास एव केवलं प्रवर्त्तते, विभक्तिविधानं[6] पराङ्गवद्भावश्च[7] न प्रवर्तेत । यदि पुनर्व्यपेक्षारूपं सामर्थ्यमधिकारश्च निर्दिष्टः स्यात् तर्हि विभक्तिविधानं पराङ्गवद्भावश्च प्रवर्त्तेते। यदि व्यपेक्षारूपसामर्थ्यस्य परिभाषायाश्च निर्देशः स्यात् तर्हि सर्वः पदविधिः सङ्ग्रहीतुं शक्यते, समासविधिमपहाय, समासविधेः प्रवर्त्तनायैकार्थीभावः सामर्थ्यं परिभाषा चेत्येवमवश्यं कर्त्तव्यं स्यात्, परं तदपि वचनं पूर्ववचनान्ना विरोधमाप्नुयात्।[8]

भिन्नार्थकानि यानि पृथगवस्थितानि पदानि एकीभवन्ति, तेषां पदानां यानि एकार्थकता सैवैकार्थीभावशब्देनोच्यते। वाक्ये विद्यमानानां पदानां नैकार्थकत्वं जायते, तत्र भिन्नार्थस्यैव दृश्यमानत्वात्। अतस्तत्र व्यपेक्षासामर्थ्यं भवति। भिन्नार्थानां पदानां परस्परं या आकाङ्क्षा तद्रूपैव व्यपेक्षात्राङ्गीक्रियते।[9]

पदविधीनां सामर्थ्याभिधायके **समर्थः पदविधिः**[10] इतिसूत्रे समर्थशब्दः शक्तार्थबोधकः। विग्रहवाक्यस्य यो हि अर्थस्तस्यार्थस्याभिधाने शक्तः इत्यर्थः। सामर्थयमेतत् प्रयोगतोऽनुसरणीयं वर्त्तते । विग्रहवाक्यार्थाभिधानरूपा वृत्तिः समासे वर्तते तद्धिते च । परं पराङ्गवद्भावविभक्तिविधानयोर्न सा दृश्यते तत्र विग्रहवाक्यार्थानभिधानात् । तदर्थमुपचारेण व्यवहारः क्रियते-समर्थपदाश्रयत्वात् समर्थ इति । समर्थानि पदान्याश्रयो यस्य स समर्थपदाश्रयः, तद्भावः समर्थपदाश्रयत्वम् । अनेन प्रकारेण समासादिः समर्थो जायते । यस्याश्रयः समर्थः सोऽपि आश्रयधर्मारोपात् समर्थ एव भवति। दृश्यते च कारणधर्माणां कार्ये

उपचारो भवतीति, समर्थः-सम्बन्धार्थः, संसृष्टार्थो वा। समर्थशब्देन वाक्ये व्यपेक्षालक्षणं सामर्थ्यम् , संसृष्टार्थशब्देन समासे एकार्थीभावलक्षणं सामर्थमवगन्तव्यम्।[11]

इदं विचार्यते - पदविधीनां समर्थाधिकारेण सामर्थ्ये-एकार्थीभावरूपे समाश्रितेऽपि यथा **कष्टं श्रितः कष्टश्रितः** इति भवति, कथं तर्हि महत् कष्टं श्रित इत्यत्र समासो न प्रवर्तते। अत्रावधेयम् - **महत् कष्टं महाकष्टम् महाकष्टं श्रित** इत्येवं रूपं यदि वाक्यं स्यात्, तर्हि जायत एव समासः **महाकष्टश्रितः** इति। परं महत् कष्टं श्रितः इत्येव रूपे वाक्ये समासाभाव एव सङ्गच्छते। एवं मन्यते सुप्सुपा इत्यस्यानुवर्तनात् बहूनां पदानां समासो न प्राप्यते किं च द्वयोरेव। आकृतिपक्षमवलम्ब्यायं विचारः सङ्गच्छते। आकृतेः प्रत्येकं पदार्थे परिसमापनात्, न तु समुदाये। एवमिहापि सुप्सुपा इति द्वयोरेव पदयोः समासविधिः समीचीनो न बहूनां पदानाम्। सापेक्षस्तु द्वयोरपि पदयोर्न प्रवर्तते समासापेक्षस्यासामर्थ्यात् सापेक्ष मसमर्थंच भवतीति न्याय्यं वचनम्।

**शास्त्रीयविशिष्टसामर्थ्यम् - इसुसोः सामर्थ्ये** (अ. 8.3.48) इति सूत्रे सामर्थ्यपदोपादानान्न सामान्यं सामर्थ्यं परिगृह्यते किं च व्यपेक्षारूपविशिष्ट-सामर्थ्यम्। पदविधित्वादेव षत्वविधानस्य **समर्थः पदविधिः** (अ. 2.1.1) इति वचनानुसारेण सामर्थ्ये लब्धे सति यत् सामर्थ्यपदमुपादीयते सूत्रे तस्येदमेव व्याख्यानात्तात्पर्यं गृह्यते।[12]

इदं विचार्यते **इसुसोः सामर्थ्ये** (अ. 8.33.44) इत्यत्र सामर्थ्यशब्दः सामान्यतया पठितः। सामान्यशब्दाश्च प्रकरणादिकमन्तरेण न विशेषार्थान् बोधयितुं समर्थाः। अत्र च प्रकरणादेरभावात् कथं व्यपेक्षारूपस्य विशिष्टसामर्थ्यस्य ग्रहणं कर्तुं शक्यते ? इदमुच्यते अत्र पदाधिकारस्य (पदस्य-अ.8.1.16) प्रवृत्तत्वात् समर्थपरिभाषा (समर्थः पदविधिः अ.2.1.1) उपतिष्ठते। तेनैव च सामर्थ्यस्याबबोधे सति यत् पुनः सामर्थ्यग्रहणं क्रियते, तस्येदमेव प्रयोजनम् इष्टसामर्थ्यस्य परिग्रहो न सम्भवः। इष्टं चात्र वृयपेक्षालक्षणमेव सामर्थ्यम्, तदेवात्राश्रीयते, नैकार्थीभावो वाप्युभयमिति।[13]

**समर्थः पदविधिः** (अ.21.1) इति परिभाषावचनेन पदविधौ यत् सामर्थ्यमपेक्ष्यते तस्य फलं वर्णाश्रये शास्त्रे आनन्तर्यमात्रे कार्यं यथा स्यात् इति प्रयोजनमस्ति। एतेन तिष्ठतु दध्यशान त्वं शाकेन इत्यत्र आनन्तर्ये सति **इको यणचि** (अ. 6.1.77) इति यणादेशो जायते।

समर्थः इत्यत्रैकशेषः समर्थस्य च समर्थयोश्च समर्थानां वेति। समर्थानां पदानां विधिर्भवतीति व्याख्यानं साधुः मन्यते समादृत एकशेषविधौ पदविधिरयं द्वेकयोरपि प्रवर्तते। भिन्नविभक्तीनां समर्थात् समर्थे पदे इत्येतासामपि समासो भवति-समर्थपदयोर्विधिशब्देन सह सर्वविभक्तयन्तसमासस्याङ्गीकारात्। समर्थस्य विधिः समर्थविधिः, समर्थयोर्विधिः समर्थविधिः, समर्थानां विधिः-समर्थविधिःसमर्थात् विधिः-समर्थविधिः, समर्थ विधिः-समर्थविधि। पदस्य विधिः-पदविधिः, पदयोर्विधिः-पदविधिः, पदानां विधिः-पदविधिः, पदाद्विधिः-पदविधिः, पदेविधिः-पदविधिः। समर्थविधिश्च..समर्थविधिश्च.. इति

समर्थविधयः। पदविधिश्च....पदविधयः। समर्थविधयश्च पदविधयश्च समर्थः पदविधिः। अत्र पूर्वः समास उत्तरपदाश्रयत्वात् समर्थशब्देनोच्यत इत्यर्थः। समर्थः पदविधिरित्यत्र भेदाभेदविवक्षासम्भवे सति यदृच्छया अभेदविवक्षामाश्रित्य प्रथमया विभक्त्या निर्देशः क्रियते।

अन्नेन व्यञ्जनम्[14], भक्ष्येण मिश्रीकरणम्[15] इत्येताभ्यां सूत्राभ्यां क्रमेण व्यञ्जनवाचि तृतीयान्तमन्नवाचिना सुबन्तेन, मिश्रीकरणवाचि तृतीयान्तं च भक्ष्यवाचिना सुवन्तेन सह समस्यते। दध्ना उपसिक्त ओदनो दध्योदनः, क्षीरोदनः। एवञ्च गुडेन मिश्रा धानाः गुडधानाः। अत्राशङ्क्यते व्यञ्जनवाचि-मिश्रीकरणवाचि च यत् तृतीयान्तमन्नवाचिना भक्ष्यवाचिना च सुवन्तेन सह समस्यते तत्र न दृश्यते सामर्थ्यम, अतः अत्र असमर्थसमास इति। कारकाणां क्रियया सह सामर्थ्यं नास्तीति वार्त्तिककारादयो वदन्ति।[16] एवञ्च सामर्थ्याभावादप्राप्ते समासे सूत्रवचनात् तत्र समासः प्रवर्त्स्यत इति व्याख्यातव्यम्।

दध्योदनः इत्युक्ते दधिपदार्थस्य संस्कारत्वमोदनपदार्थस्य च संस्कार्यत्वं प्रतीयते। स च संस्कार्यसंस्कारकभाव उपसेकक्रियामन्तरेण नोपपद्यते, एवं चात्रोपसेकार्थोऽवगम्यते। अत उक्त वृत्तिकारेण - **वृत्तौ क्रियया अन्तर्भावात् पूर्वोत्तरपदयोः सामर्थ्यम्**[17]। तत्र **समर्थानां प्रथमाद्वा** (अ. 4.1.82) इति सूत्र सामर्थ्ये सति कार्यविधानाय एव उक्त सूत्र समर्थग्रहणं क्रियते। तत्र वदन्ति वार्त्तिकाकारादयः -

**समर्थवचनमनर्थकं न ह्यसमर्थेनाभिधानाम्**[18] इति। अयम्भावः असमर्थात् कस्माच्छब्दादुत्पद्यमानेन प्रत्ययेन न किञ्चिदर्थाभिधानमिप्सितं क्रियते, एवमनभिधानात् प्रतययो न भविष्यति। एतेनासमर्थेनार्थस्याभिधानाभावादेव प्रत्ययाभावो जायते, समर्थात् प्रत्ययविधानाय न समर्थवचनमपेक्ष्यत इति। असमर्थः व असमर्थशब्दादुत्पन्नः प्रत्ययो गृह्यते उपचारात्। तत्तदर्थेषु प्रयुक्तानामेव शब्दानां व्याकरणेऽन्वाख्यानं क्रियत इत्यभिप्रेत्यात्रानभिधानप्रसङ्गो वर्त्तते।

**समर्थानां प्रथमाद्वा** (4.1.82) इत्यत्र समर्थशब्देन कृतवर्णानुपूर्वीकं पदं गृह्यते। तेन चार्थबोधनसामर्थ्यं विशिष्टे एव पदे वर्त्तते। अतः सूत्थित इति शब्दात् इञ्प्रत्यये सौत्थितिः इति शब्दरूपं साधु भवति। अन्यथा तत्र सु उत्थित इति विभाजनात् सावुत्थितिः इत्यनिष्टं रूपं स्यात्, **बार्णाद्रङ्गं बलीयः** (परि. वृ. परि. 74) इति न्यायेन वृद्धिप्रसङ्गात्। अत्र भट्टोजिदीक्षिताः शब्दान्तरेणोक्तमेवार्थं निर्दिशन्ति - सामर्थ्यं परिनिष्ठिततत्वम्। कृतसन्धिकार्यत्वमिति यावत्।[19]

समानार्थकसामर्थ्यम् - समर्थपदे उपात्तः समशब्दः समानार्थकः क्वचिदुपादीयते। तत्र समानार्थकसमशब्दस्य अर्थशब्दादौ वर्त्तमानस्याकारस्य च स्थाने निपातनादतोलोपे पूर्वरुपैकादेशे वा कृते समर्थशब्दो निष्पद्यते इति इति पदमञ्जरीकारादयः।[20] तत्र समशब्दः समानार्थकः प्रयुक्तो दृश्यते।

अत्रोच्यते - समर्थग्रहणं नावश्यकम् । अन्यशब्दस्य साहचर्यादेव एकशब्दोऽन्यार्थक इहाङ्गीकरिष्यते, एतेन समर्थग्रहणेन व्यवस्थाकरणमनर्थकं प्रतीयते। परं **निपातैर्यद्यदिहन्तकुविन्नेच्चेणकच्चिद्यत्रयुक्तम्**[21] इति सूत्रे निपातग्रहणं ज्ञापकम् - प्रकरणेऽस्मिन् साहचर्येण व्यवस्था नाश्रीयते। साहचर्यस्य व्यवस्थाकारणत्वादत्र समर्थग्रहणेन व्यवस्था क्रियते[22] एकशब्दोऽन्यार्थक सवोक्तसूत्रे गृह्यते इति।

**एकार्थीभावविवेचनम्** - न एकार्थोऽनेकार्थऽनेकार्थस्यैकार्थत्वमेकार्थीभाव इति व्युत्पत्त्या, **पृथगर्थानामेकार्थीभावः समर्थवचनम्**[23] इति वार्त्तिककारोक्तिः । यदा तावदेकार्थीभावः[24] सामर्थ्यं तदेवं विग्रहः करिष्यते सङ्गतार्थः समर्थः, संसृष्टार्थः समर्थ इति, तद्यथा - सङ्गतं घृतं सङ्गतं तैलमित्युच्यते एकीभूतमिति गम्यते। संसृष्टोऽग्निरित्युच्यते एकीभूत इति गम्यत इति भाष्यकारोक्तया च क्रियादशायां लौकिकविग्रहवाक्ये पृथगर्थवाचकत्वेन दृष्टानां पदानां समासे तावदेकार्थपतिपादकत्वमेकार्थीभाव इति निष्पद्यते।

प्रदीपकारस्तु-[25] **यत्र पदान्युपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा प्रधानार्थोपपादनाद् व्यर्थानि अर्थान्तराभिधायीनि वा स एकार्थीभाव** इति व्याचक्ष्ये। पुनश्च शब्दानां नित्यत्वमर्यादामुररीकृत्य यद्यपि[26] शब्दान्तरमेव वृत्तिः, अवयवा वर्वदनर्थकाः, तथापि सादृश्यात्तत्त्वाध्यवसायं पदानामाश्रित्य पृथगर्थानामेकार्थीभाव इति। न्यासकारस्तु-[27] **एकार्थीभावश्च पृथगवस्थितानां भिन्नार्थानां पदानां समासे साधारणार्थता नामावस्थाविशेषः**। पदमञ्जरीकारश्च-[28] **सामर्थ्यं प्रयोगतोऽनुसर्त्तव्यम्**। न पुनरियं वृत्तिरस्य वाक्यार्थाभिधानसमर्था, नान्यस्येत्येतत् सूत्राक्षरैर्लभ्यते। अत एवास्मिन् व्याख्यानेऽपरितुष्टः सन् व्याख्यान्तरमाह काशिकाकारः - **यः कश्चिदिह शास्त्रे पदविधिः श्रूयते स समर्थो वेदितव्यः**[29]। मञ्जुषाकारस्तु- **यत् कश्चित् पदजन्यपृथगुपस्थिति-विषयार्थकत्वेन लोके दृष्टानां शब्दानां विशिष्टविषयैकशक्त्यैवोपस्थिति-जनकत्त्वमेकार्थीभावः।**[30]

**भाष्यकारोक्तदिशा** - तत्रैकार्थीभावः[31] सामर्थ्यं परिभाषा चेत्येवं सूत्रमभिन्नतरकं भवति इत्येकार्थीभावरूपसामर्थ्य एव समासविधेः स्वीकारेऽपि सापेक्षसमर्थ भवति इति भाष्यकारवचनप्रामाण्यम्।[32] यथोक्तं वाक्यपदीये -

**सम्वन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते।**
**वाक्यवत् व्यपेक्षा हि वृत्तावपि न हीयते।।**[33]
**समुदायेन सम्बन्धो येषां गुरुकुलादीना।**
**संस्पृश्यावयवास्ते तु युज्यन्ते तद्वता सह।।**[34]

एतद्धि - एकार्थावाभिधं सामर्थ्यं समास एव न तु वाक्ये। प्रमाणश्चात्र समर्थसूत्रस्थं[35] समर्थानां प्रथमाद्वा[36] इति सूत्रस्थं भाष्यमेव।

अयमेकार्थीभावः शाब्दिकैर्विशिष्टशक्तिरूपेणोद्घोष्यते।

यत्तु व्यपेक्षावादिनो मीमांसकनैयायिकादयो वाक्याद् वाक्याद् वृत्तिं निष्पाद्यमानां मन्वानाः शब्दानित्यत्ववादिनो वैयाकरणाश्च समासेऽपि पदानि विभज्य क्लृप्तया शक्त्या साधुत्वमामनन्ति, न चैकार्थीभाववात्मिकां शक्तिमङ्गीकुर्बन्ति । कार्यशब्दाभ्युपगन्तॄणां वैयाकरणानां मते समासे विशिष्टशक्त्यस्वीकारे निष्कौशाम्बिः, गोरथः, घृतघटः, गुडधानाः, केषचूडः, सुवर्णालङ्कारः, द्विदशः, सप्तपर्णः, गौरखर इत्यादिषु पदेषु क्रान्त-युक्त-पूर्ण-मिश्र-सङ्घात-विकार-सुच्प्रत्ययलोप-वीप्सा-जातिविशेषाभिधायित्वञ्च वचनैरेव प्रतिपाद्यं स्यात्, तन्महद्गौरवमापद्येत । नित्यशब्दवादे एकार्थीभावाभ्युपागमे च न किमपि कल्प्यं विशिष्टशक्त्यैव तल्लाभात्। तदेवोक्तं भूषणसारे[37] -

**समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्।**

**बहूनां वृत्तिधर्माणां वचनैरेव साधने,**

**स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः॥**

यद्यपि नव्यैः शाब्दिकैः कैश्चिद् - निरादि पूर्वपदानां क्रान्ताद्यर्थवृत्तितया नैकार्थीभावकृतविशेषत्वेन प्रतिपादनस्यावश्यकता। न च किञ्चित् कल्पनीयम् , अत एव तत्कृतविशेषेषु नैतेषामुक्तिः । एवमुभयपक्षेऽपि विशेषतया केवलेनैतेन व्यपेक्षावादो न तिरस्करणीय इत्यादिप्रवलैः शब्दैः समासे व्यपेक्षावादोऽनुमोदितः।

तत्र सिद्धे शब्दार्थसम्बन्धे[38], शब्दा नित्या[39], अनादिनिधना[40] नित्या वागुत्सृष्टा स्वयम्भुवा–

**द्वे ब्रह्मणि वेदितव्ये शब्दब्रह्म परं च यत्।**

**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥**[41]

**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।**

**विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥**[42]

**पदे न वर्णाः विद्यन्ते वर्णेष्ववयवा न च।**[43]

**शब्दान्तरत्वादत्यन्तं भेदो वाक्यसमासयोः।**[44]

**शब्दान्तरमेव वृत्तिः अवयवा वर्णवदनर्थका।**[45]

इत्याद्यभियुक्तोक्तिभिः शब्दानां नित्यत्वाद् एकार्थी भावात्मकशक्तिविशिष्ट-समासात्मकपदस्य व्यपेक्षावादे सङ्ग्रहो न भवितुं शक्यते। अत एव भाष्यकारो[46] व्यपेक्षायां सामर्थ्येऽधिकारपरिभाषयोरपि पक्षयोः समासस्यासङ्ग्रहं मुक्तकण्ठेनोद्घोषितम्।

पदोद्देश्यकविधीनां सामर्थ्यविधानार्थं महर्षिणा **समर्थः पदविधिः** इति सूत्रं प्रणीतम्। सामर्थ्यञ्च लोके वाक्यात्मकं समासात्मकं द्विविधं दृश्यते। तदेवानुसृत्य भगवतो

वार्त्तिककारस्य **पृथगर्थानामेकार्थीभावः समर्थवचनम्**[47] **परस्परव्यपेक्षा सामर्थ्यमेके**[48] इति वचनद्वयं प्रतिष्ठते । तदनुयायिभिर्महाभाष्यकारादिभिश्च तथेदमपरं[49] द्वैतं भवति - एकार्थीभावो वा सामर्थ्यं व्यपेक्षा वेत्याद्युक्तिभिः समासैकार्थीभावात्मकता वाक्यस्य च व्यपेक्षात्मकता प्रतिपादिता । आधुनिके युगे वैज्ञानिकैः शब्दानां नित्यता प्रयोगरूपेण साधिता। अतः शब्दानित्यत्ववादिनां मतं खपुष्पवद् निराधारमेवेति विद्वद्भिः समाधेयम्।

**सन्दर्भाः**

1. उद्धृत, टे.ट., प्रा.भा., पृ. 186
2. शि.ब. 2.77.79
3. अ. 6.1.75
4. एकस्यैव स्वरस्य गुणः - भवति (सार्वधातुकार्धधातुकयोः, अ. 7.3.84।), वृद्धिः - अकार्षीत् (सिचि वृद्धिः परस्मैपदेषु, अ. 7.2.1), दीर्घः - भवामि (अतो दीर्घोयञि, अ. 7.3.101।), पूर्वपरयोः स्थाने गुणः- रमेशः (आदगुणः अ. 6.1.87), वृद्धिः ब्रह्मादनः (वृद्धिरेचि- अ.6.1.88।) दीर्घः - दैत्यारिः (अकः सवर्णे दीर्घः अ. 6.1.101।)
5. म.भा. 1.15.51
6. अनभिहिते- अ. 2-3-1
7. सुबामन्त्रिते पराङ्गवत् स्वरे अ. 2.1.2
8. व्यपेक्षायां पुनः सामर्थ्ये परिभाषायाश्च सत्यां यावान् व्याकरणे पदगन्धो नाम स सर्वः सङ्गृहीतो भवति, समासस्त्वेकोऽसंग्रहीतः तत्रैकार्थीभावः सामर्थ्यं परिभाषा चेत्येवं सूत्रमभिन्नतरकं भवति- म.भा. 2.1.1
9. यत्र पदान्युपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा प्रधानार्थोपादानाद् द्यर्थानि, अर्थान्तराभिधायीनि वा सा स एकार्थीभावः। परस्परसाकाङ्क्षारूपा व्यपेक्षा। म.भा. 2.1.1
10. अ. 2.1.1
11. पदानां विधिः - पदविधिः। स पुनः समासादिः। समर्थः-शक्तः। विग्रह-वाक्यार्थाभिधाने यः शक्तः सः समर्थो वेदितव्यः अथवा समर्थपदाश्रयत्वात् समर्थः। समर्थानां पदानां संबद्धार्थानां संसृष्टार्थानां विधिर्वेदितव्यः (का.वृ.-2.1.1)
12. ननु च सामर्थ्यशब्दः सामान्यशब्दः । चन च सामान्यशब्दः प्रकरणादिकमन्तरेण विशेषे अवतिष्ठते, तत् कथं व्यपेक्षैव सामर्थ्यं गृह्यते, न पुनरेकार्थीभाव इत्युच्यते। उभयं तु कस्मान्न गृह्यते, अत आह- उभयं वेति। नेत्येव, उभयमपि गृह्यते इति यत् तदपि न। अयं भावः- पदविधित्वादेव समर्थपरिभाषोपस्थानात् सामर्थ्ये लब्धे पुनः सामर्थ्यग्रहणादिष्टस्य व्यपेक्षालक्षणस्यैव सामर्थ्यस्य परिग्रहः, नेतरस्य, नाप्युभयोरिति। (म.प. 8.3.44)
13. द्र.-का.वृ.. 8.3.44
14. अ. 2.1.34
15. अ. 2.1.35
16. अन्नेन व्यञ्जनं, भक्ष्येण मिश्रीकरणमित्यसमर्थसमासः, कारकाणां क्रियया सामर्थ्यात्। (म.भा. 2.1.34 वा. 1-2)

17. (का.-वृ.-2.1.35)
18. म.भा. 4.1.82 वा. 1
19. सि.कौ.-4.182
20. प.म.-1.3.42, 2.3.57, 3.3.152
21. अ. 8.1.30
